आरण्यकम् सितम्बर 2008
अर्धवार्षिकं संस्कृतशोधपत्रम् आर.एन.आई. सं.58951/94

## संस्कृतप्रसारपरिषद्, आरा

### प्रकाशनम्

1. मेघदूतम् (सभूमिका-हिन्दीपद्यानुवादसहितम्) - स्व. पण्डित कमलाकान्त उपाध्यायः 15 रूप्यकाणि
2. भोजपुरी नीतिसतक (भर्तृहरि 'नीतिशतक'स्य भोजपुरी-पद्यानुवादः) -श्री देवकुमार मिश्रः 'अलमस्त' 15 रूप्यकाणि
3. पण्डित दीनदयाल उपाध्याय के 'एकात्ममानवदर्शन' की मीमांसा - श्री नर्मदेश्वर ओझा 15 रूप्यकाणि
4. माण्डूक्योपनिषद्-'नलिन-भाष्य' - पं. जगदीश्वर प्रसाद मिश्र 'नलिन' 35 रूप्यकाणि
5. भरतचरितम् (महाकाव्यम्) - स्व. भवानीदत्त शर्मा 51 रूप्यकाणि
6. राष्ट्रियता : सांस्कृतिक अवधारणा - श्री नर्मदेश्वर ओझा 51 रूप्यकाणि
7. संस्कृतनिबन्धसञ्चयनम् - पं. व्रजभूषण मिश्र 'आक्रान्तः' 41 रूप्यकाणि
8. ईशावास्योपनिषद् एवं केनोपनिषद्-'नलिन-भाष्य' - श्री जगदीश्वर प्रसाद मिश्र 'नलिन' 51 रूप्यकाणि
9. आध्यात्मिकनिबन्धसंग्रह - श्री जगदीश्वर प्रसाद मिश्र 'नलिन' 51 रूप्यकाणि
10. उपेन्द्रविज्ञानदर्शनम् (वेदान्तग्रन्थः) - स्व. पं. उपेन्द्रनारायणदत्त शर्मा 41 रूप्यकाणि
11. भावनाविलासशतकम् - स्व. पं. उपेन्द्रनारायणदत्त शर्मा 21 रूप्यकाणि
12. हनुमच्चरितम् - स्व. पं. वज्रभूषणमिश्र 'आक्रान्तः' 51 रूप्यकाणि
13. उपनिषदों की भूमिका - पं. जगदीश्वर प्रसाद मिश्र 'नलिन' 51 रूप्यकाणि
14. महाभारतसारसंग्रहः (प्रकाश्यः) - स्व. पण्डित वचन मिश्रः
15. चरितरत्नत्रयी - स्व. पं. व्रजभूषणमिश्र 'आक्रान्तः' 51 रूप्यकाणि
16. जगन्नाथचरितम् - डॉ. बनमाली बिश्वालः 60 रूप्यकाणि
17. कृत्-प्रत्ययविश्लेषण - डॉ. गोपबन्धु मिश्रः 204 रूप्यकाणि

# आरण्यकम्

अर्धवार्षिकं संस्कृतशोधपत्रम्

संस्कृतप्रसारपरिषद्
आरा (विहारः)

संस्कृतप्रसारपरिषद्, आरा (विहार:) सरस्वती नः सुभगा मयस्करत्

पञ्चदश वर्षम्, द्वितीयोऽङ्कः
सितम्बर 2008

## ‘आरण्यक’स्य नियमाः

1. संस्कृतप्रसारपरिषद्, आरा-पक्षत इदं षाण्मासिकं शोधपत्रं संस्कृतेन चैत्र-आश्विनमासयोः (मार्च-सितम्बर) प्रकाश्यते। वर्षारम्भः चैत्रात् (मार्च तः) मन्यते।
2. ग्राहकत्वं पूर्णवर्षस्यैव स्वीक्रियते। मध्येवर्षं ग्राहकत्वं काङ्क्षतः पूर्णवर्षस्य शुल्कमपेक्ष्यते। तादृशाय ग्राहकाय वर्षस्य पूर्वप्रकाशितोऽङ्क उपलब्धौ सत्यां प्रेषयिष्यते।
3. वार्षिकं शुल्कं पञ्चाशत् (50) रूप्यकाणि, तथा च एकस्याङ्कस्य पञ्चविंशतिः रूप्यकाणि वर्तते। शुल्कं धनादेश/ड्राफ्टमुखेन प्रेषणीयम्।
   (क) धनादेश (M.O) द्वारा शुल्कप्रेषणं **श्री नीलमणि पाठकः, गणपति ज्वेलर्स के पीछे, महावीरस्थान, मौलाबाग, आरा( विहार )-802301** दूरभाषः-09431451895 नाम्ना करणीयम्।
   (ख) बैंक ड्राफ्ट **‘संस्कृतप्रसारपरिषद्’** इति नाम्ना **‘आरा’ ( विहारः )** नगरे व्यवहरणीयं कृत्वा **श्रीनीलमणि पाठकस्य** उपरिलिखिते (3.क इत्यत्र) सङ्केते प्रेषणीयम्।
4. विमर्शात्मका अनुसन्धानात्मकाश्च शास्त्रीया अप्रकाशितपूर्वा उच्चस्तरीया गम्भीराश्च मौलिका निबन्धाः प्रकाशनाय गृह्यन्ते। अस्वीकृता लेखा निर्धारित-‘स्टाम्प’-प्राप्त्यनन्तरं प्रत्यावर्तयितुं शक्याः।
5. काव्य-नाटक-चरित्रवर्णन-व्यङ्ग्य-हास्यसम्बद्धा नव्या रचना अत्र स्थानं न लभन्ते।
6. प्रकाशनाय प्रेषिताः सर्वविधा रचनाः शुद्धा एकस्मिन् पत्रपृष्ठे सुस्पष्टाक्षरैः लिखिताः टङ्किता वा स्युः। रचनाऽन्ते रचयितुः आवाससङ्केतः पदनिर्देशश्च उल्लिखितौ स्याताम्।
7. प्रकाशितसंस्कृतकाव्यनाटकाऽऽलोचनादिग्रन्थानां समीक्षार्थं सम्बद्धग्रन्थस्य प्रतिकृतिद्वयं सम्पादकं प्रति प्रेषणीयम्।
8. लेखकेभ्यः तत्प्रकाशितलेखानां पञ्च प्रतिरूपाण्यपि दीयन्ते।
9. लेखानां प्रकाशनस्य सम्पादनस्य च सर्वाधिकारः सम्पादकाधीनः।
10. ‘आरण्यक’सम्बद्धः लेखप्रकाशनसमीक्षादिविषयकः सर्वविधपत्रव्यवहारः **डॉ. गोपबन्धु मिश्रः, प्रोफेसर, संस्कृतविभागः, काशी हिन्दू विश्व-विद्यालयः, वाराणसी-221005 इति सङ्केतेन** दूरभाषः-0542-2310561, (चलः) 09450870788 विधेयः।

# आरण्यकम्

संस्कृतप्रसारपरिषदः अर्धवार्षिकं शोधपत्रम्

वर्षाङ्कौ - पञ्चदश वर्षम्, द्वितीयोऽङ्कः

आश्विनः, वि.सं. २०६५

सितम्बर, २००८

प्रतिवर्षं प्रकाशनकालः
चैत्रः, आश्विनः-विक्रमाब्दः
मार्च, सितम्बर

*प्रत्यङ्कम् - २५ रूप्यकाणि*
*संयुक्ताङ्कः - ५० रूप्यकाणि*
*वार्षिकं शुल्कं ५० रूप्यकाणि*

## परामर्शदात्री समितिः

डॉ. सुरेशचन्द्र गो. काण्टावाला, बड़ोदरा
डॉ. हरिहर झा, दरभङ्गा
डॉ. उमाशङ्कर शर्मा 'ऋषिः', पटना
डॉ. भागीरथ त्रिपाठी 'वागीशः शास्त्री', वाराणसी
डॉ. राय अश्विनी कुमारः, बोधगया

संस्थापकः
**स्व. पण्डित व्रजभूषण मिश्र 'आक्रान्तः'**

सम्पादकः
**प्रो.गोपबन्धु मिश्रः**
संस्कृतविभागः
काशी हिन्दू विश्वविद्यालयः, वाराणसी

सह-सम्पादकः
**डॉ. सुनीलकुमार प्रधानः**

प्रकाशिका
**संस्कृतप्रसारपरिषद्**
मारुतिमन्दिरम्
प्रकाशपुरी, आरा (विहारः) 802301

संस्कृतप्रसारपरिषद्, आरा पक्षतः प्रो. गोपबन्धु मिश्रेण, महावीर प्रेस, बी.20/44, भेलूपुर, वाराणसी इत्याख्ये मुद्रणालये मुद्रितं प्रकाशितं च।

**प्रो. गोपबन्धु मिश्रः**
सम्पादकः

# सम्पादकीयम्

संसारे सर्वेषां ज्ञानविज्ञानसम्बद्धानां विषयाणां तत्त्वानि विमृश्यन्ते, समीक्ष्यन्ते ऊह्यन्ते च। विषयो नित्य उत तद्गतं तत्त्वं नित्यमित्यपि विविच्यते। नित्यानित्यलक्षण-निरूपणप्रसङ्गे महर्षिः पतञ्जलिराह–

**अथवा नेदमेव नित्यलक्षणम्–ध्रुवं कूटस्थमविचाल्यनपायोपजनविकार्य-नुत्पत्त्यवृद्ध्यव्यययोगि यत्तन्नित्यमिति। तदपि नित्यं यस्मिंस्तत्त्वं न विहन्यते** इति। (पस्पशाह्निकम्) अर्थात् 'जायते, अस्ति, विपरिणमते, वर्धते, अपक्षीयते, विनश्यति' इति षड् भावविकाराः यस्य न सन्ति तद् 'ब्रह्म' अनाद्यनिधनम् 'आत्मा' इत्यादिपदवाच्यं यत्किञ्चिद्वस्तुजातं तु नित्यपदवाच्यं भवति। किन्तु यस्य वस्तुनः एते विकाराः भवन्ति यद् वा उत्पत्तिविनाशशीलं भवति तादृशं घटपटाद्यपि वस्तु नित्यपदवाच्यं भवितुमर्हति इति तर्कान्तरं प्रस्तुवन् भाष्यकारो ब्रवीति–**किं पुनस्तत्त्वम्? तस्य भावस्तत्त्वम्। आकृतावपि तत्त्वं न विहन्यते** इति। अर्थात् वस्तुनो भावः एव तत्त्वपदवाच्यो भवति। वस्तुनि विनष्टेऽपि एष तत्त्वाख्यो भावोऽविनाशी तिष्ठति, तद्यथा एकस्मिन् घटे नष्टेऽपि तद्गतः प्राणप्रदो धर्मः 'घटत्वं' न नश्यति। अतः तादृश्याम् आकृतौ जातौ वा तत्त्वं नाम घटत्वं सुरक्षितं तिष्ठति। किं च इह दृश्यमानो घटः स्थानान्तरे दृश्यमानात् घटात् भिन्नो भूत्वापि तद्गततत्त्वविशेषकारणेन 'घटः' इति परिचीयते। तथा च इदानीं दृश्यमानात् घटाद् अनन्तरं दृश्यमानस्य घटस्य भेदे सत्यपि अभिन्नतया यद् 'घट' इत्येवंप्रकारेण अवगम्यते तत् तद्गतस्य तत्त्वस्य घटत्वस्य कारणेन इति विमृश्य एषा नित्यता **प्रवाहनित्यता** इति उक्तभाष्यवृत्तौ वदति आचार्यो नागेशः–

**यस्मिन् विहतेऽपि तद्वृत्तिधर्मो न विहन्यते इत्यर्थः। प्रवाहनित्यता चानेनोक्ता। तन्नाशेऽपि तद्धर्मो व नश्यति। आश्रयप्रवाहाविच्छेदादिति भावः** (उद्द्योतः, पस्पशाह्निकः)। प्रवाहनित्यता नाम वस्तुनः अवस्थान्तरप्राप्तौ सत्यामपि वस्तुनिष्ठप्रवाहपरम्पराया अव्याहततेति। तद्यथा–गङ्गोत्र्याः निष्क्रान्ता जलधारा कनखले यादृशी यत्परिमिता च भवति वाराणस्यां ततः सुतरां भिद्यते, किन्तु

उभयत्र प्रवाहनित्यताकरणेनैव सा 'गङ्गा'पदवाच्या भवति। तद्वच्च शिशुः मोहनः युवा भूत्वा दृश्यान्तरतामाप्नोति चेदपि मोहनपदवाच्यतां नैव जहातीति तस्य आश्रयप्रवाहस्य अविच्छिन्नता ऊहितुं शक्येति भावः। एतत् नित्यं विद्यमानं तत्त्वं वाच्यं न अपितु व्यङ्ग्यमेव भवति। बहुषु स्थलेषु 'घट' 'घट' इति प्रायः समानाकारान् घटान् वीक्ष्य तद्व्यङ्ग्येन घटत्वेन एषः घटः सोऽपि घट इति परिचयो लभ्यते इति एषः पदार्थवृत्तिधर्मः तत्त्वमिति अत्राशयः स्फुटः। तदेव स्पष्टीकरोति श्रीरुद्रधरझाशर्मा उक्तभाष्योद्द्योतटीकायां तत्त्वालोके-**तत्त्वम् अर्थात् तद्व्यङ्ग्यजातिरूपस्तद्वृत्तिधर्मः** इति।

शास्त्राणां विषयेऽपि तद्गततत्त्वानाम् अविहतता एवम् ऊहितुं शक्यते। प्राचीनकालत आरभ्य आधुनिककालं यावत् शास्त्रविषयकविमर्शप्रसङ्गे वाक्य-व्यवहारस्य व्यापकता विविधता च साक्षात्कर्तुं शक्यते। पूर्वमतखण्डनपुरः-सरस्वमतमण्डनरीतिः सर्वथा संलक्ष्यते। किन्तु एतेषु परिवर्तनेषु तदेकं वैशिष्ट्यं किमपि अपरिवर्त्तितं सत् तिष्ठतीति तत् 'तत्त्व' पदवाच्यं भवितुमर्हति। तदस्ति शास्त्रकाराणाम् 'आस्तिक्य' बुद्धिः। सर्वेषां शास्त्राणां प्रवर्तने संरक्षणे विस्तारे च तदेकम् आस्तिक्यं प्रवाहनित्यता इव सर्वथा दृश्यमानं भवति। ब्रह्मकर्मविवेचनप्रसङ्गे गीतायामुक्तमस्ति श्रीभगवता–

**शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च।**
**ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम्।।** (गीता 18.42)

अत्र आस्तिक्यं व्याचक्षाणेन श्रीमच्छङ्कराचार्येण **आस्तिक्यम् अस्तिभावः** इत्युच्यते। तत्र श्रीनीलकण्ठो ब्रूते-**आस्तिक्यं श्रद्धा।** श्रीमधुसूदनः **आस्तिक्यं सात्त्विकी श्रद्धा** इति व्याख्याति। तत्रैव श्रीदेवलवचनमुद्धृत्य श्रद्धायाः स्वरूपं विवृण्वता श्रीमधुसूदनेन-

**प्रत्ययो धर्मकार्येषु तथा श्रद्धेत्युदाहृता।**
**नास्ति ह्यश्रद्दधानस्य कर्मकृत्यप्रयोजनम्।।**

इत्यपि उक्तम्। गीताया उक्तम् आस्तिक्यम् **आस्तिकस्वभाव आगमोक्तार्थेषु श्रद्धधानता** इत्येव व्याख्यातं भोज्योत्कर्षदीपिकायाम्। श्रीधरीव्याख्यायाम् उक्तमस्ति-**आस्तिक्यम् अस्तिपर लोक इति निश्चयः** इति। गीतायाम् उक्तेषु ब्राह्मणानां स्वभावजेषु शमादिषु कर्मसु एतद् 'आस्तिक्यं' किञ्चिद् वैशिष्ट्यम् आतनोति।



तच्च श्रद्धापदवाच्यमिति प्रायशः सर्वे व्याख्याकारा आहुः। सा च श्रद्धा सात्त्विकीति श्रीमधुसूदनश्चाह।

**सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत।** (गीता 17.3)

इत्यत्र श्रद्धायाः सत्त्वानुरूपत्वं विवृण्वन् श्रीमच्छङ्कराचार्यः विशिष्टसंस्कारोपेतान्तः-करणानुरूपा सर्वस्य प्राणिजातस्य श्रद्धा भवतीति वदति। अर्थात् प्राणिषु तद्गतसंस्कारमनुसृत्य श्रद्धा भवति। एषा श्रद्धा तेषां चित्तवृत्तौ अस्तिभावं जनयति, एष अस्तिभाव एव आस्तिक्यम् उच्यते। क एष अस्तिभावः? अखिले जगति नित्यं प्रवर्तमानेषु परिवर्तमानेषु च विषयेषु एकः कश्चित् नित्यधर्मः अविहततया अस्ति इति यः भावः प्राणिनां चेतसि उदेति स अस्तिभाव एव आस्तिक्यम्। अर्थात् नासीत्, नास्ति, न भविष्यति इति सर्वविधेषु विषयजातेषु साक्षाद् दृश्यमानतया यः नास्तिबोधः नास्तिक्यं वा प्रत्यक्षं परोक्षं वा अस्मान् अनुशास्ति तद् विरुद्ध्य आत्मनि एष बोधः जागरणीयो यत् सर्वेषु एतेषु नास्तिषु एकं किंचिद् 'अस्ति' इति, अन्यथा नास्तिपदवाच्यानाम् एतेषामपि प्रवृत्तिरशक्या इति काचिद् एतेषां स्थायिहेतुकता अन्वेष्टव्या, तेन च व्याजेन एतेषु प्रवृत्ति–स्थिति–संहरणशीलेषु जागतिकवस्तुषु अपि एका प्रवाहनित्यता अनुभूतिक्षमा भवितुम् अर्हति।

अस्ति इति अस्तिकम्, तस्य भाव आस्तिक्यं तच्च सर्वत्र नास्तिभावेषु विद्यमानेषु अस्तिभावं च नयन्ती 'श्रद्धा' इति पूर्वोक्तं मतम् आश्रित्य अस्माकं शास्त्राणि प्रवर्तितानि सन्ति। तर्कतर्कान्तरमतमतान्तरवाक्यवाक्यान्तरादिपरस्परविरुद्ध-स्वरूपाणि आवहन्त्यपि तानि आस्तिक्यम् अजहन्ति परिलक्ष्यन्ते। द्वैत–द्वैताद्वैत–विशिष्टाद्वैतादिभिन्नभिन्नमतानि पोषयन्त्यपि वैचारिककेन्द्राणि मूलतः यत् आस्तिक्यम् आश्रयन्ति तदेव अस्माकं शास्त्रपरम्परागतं 'तत्त्वम्' इति कथयितुं शक्यते। अत एव शास्त्रकाराणाम् एषा आ बहुकालात् प्रवाहनित्यता सुतराम् ऊहनीया। एतेन कारणेन अविच्छिन्नगत्या प्रवहन्ती सर्वत्र च 'गङ्गा' इति अभिधेयतां प्राप्नुवती गङ्गानदी इव शास्त्रीयचिन्तनपरम्परा निरन्तरं प्रचलन्ती विद्यते।

काव्यशास्त्रे रसविषयकचर्चायां प्राचीनतायां सत्यामपि आधुनिकपरम्पराम् अविहतगतिं साधयन् रसगङ्गाधरे रसनिष्पत्तिविमर्शः आरण्यकेऽस्मिन् विद्यते। रामायणगतानि राजनीतिकमूल्यानि आधुनिकसन्दर्भतुल्यानीति समीक्षणमपि तदेव तत्त्वचिन्तनं पोषयति। संसारसृष्टिविषये नासदीयसूक्तगतं रहस्यचिन्तनम् आधुनिककाले

जगति प्रवर्तमानं सृष्टिविषयकरहस्यजिज्ञासां समाधातुं प्रवर्तते। भगवतः अवतारविषयेषु या काचित् शास्त्रीयधारणा प्रवर्तिताऽस्ति तस्याः रहस्यभेदनेन तद्गतं तत्त्वं विनिश्चेतुं शक्यते। व्रताचरणैः व्यक्तित्वविकासः कथं साधयितुं शक्यते इति विमर्शेन व्रताचरणस्य आधुनिकी प्रासङ्गिकता पोष्यते। मनसः स्वरूपस्वभावविमर्शपूर्वकेण विमर्शेन एतद्विषयकः आधुनिकः शोधः, पुष्टिं गच्छेत्। काव्येषु सामान्यतः कवेरभिप्रायः गूढतया यथा निहितो भूत्वा काव्यस्य सद्यःपरनिर्वृतिसाधनतां साधयति तत् सामान्यतया पुनश्च कविकुमारदासस्य रचनाविशेषविमर्शद्वारा विशिष्टतया समीक्षितुमिष्यते।

आरण्यकस्य वर्तमानेऽङ्के एतेषां विषयाणां सन्निवेशद्वारा उपर्युक्तेन आस्तिक्येन अस्तिभावेन श्रद्धया वा सम्पूर्णशास्त्रचिन्तनपरम्परायाः प्रवाहनित्यतां साधयितुं कश्चित् प्रयत्नः परिलक्षितुं शक्यते। एतदेवास्ति एतस्य शोधपत्रस्य आत्मगतम् आस्तिक्यम् किं च सर्वेषु प्रसङ्गेषु एष अस्तिभावः प्रभवतु इति वैचारिकसङ्क्रान्तौ प्रवर्तिष्यमाणता इति श्रद्धया विश्वसिमः।

सित॰ २००४

**गोपबन्धुमिश्रः**
सम्पादकः
आरण्यकस्य



# सूचीपत्रम्


| विषयः | लेखकः | पृष्ठम् |
|---|---|---|
| 1. रसगङ्गाधरे रसनिष्पत्तिः | आचार्य रेवाप्रसादद्विवेदी<br>28, महामनापुरी कालोनी<br>वाराणसी | १ |
| 2. आधुनिके सन्दर्भे रामायणीया राजनैतिकी मूल्यावधारणा | डॉ. कामेश्वर शुक्लः<br>वरिष्ठप्रवक्ता, संस्कृतविभागः<br>गुवाहटी विश्वविद्यालयः, गुवाहटी | ५ |
| 3. नासदीयसूक्ते वैदिक-सृष्टितत्त्वस्य वैज्ञानिकानुशीलनम् | पराम्बा श्रीयोगमाया<br>शोधच्छात्रा, संस्कृतविभागः<br>उत्कलविश्वविद्यालयः,<br>वाणीविहारः, भुवनेश्वरम् | १५ |
| 4. अद्वैतवेदान्तदर्शन-प्रतिपादितं मनः - एका समीक्षा | मीनाक्षीरायः<br>शोधच्छात्रा<br>डॉ. करुणानन्दमुखोपाध्यायः<br>प्रवक्ता, संस्कृतविभागः<br>काशी हिन्दू विश्वविद्यालयः, वाराणसी | २५ |
| 5. भारतीयसमाजव्यवस्थायां व्यक्तित्वनिर्माणे व्रताचरणस्य भूमिका | प्रो. राधामाधवदाशः<br>आचार्यः, संस्कृतविभागः<br>उत्कलविश्वविद्यालयः,<br>वाणीविहारः, भुवनेश्वरम् | ३५ |
| 6. अवतारमीमांसा | डॉ. सीमा<br>6/151, शक्तिनगर<br>साकेत विहार, अनीसाबाद<br>पटना (बिहार) | ४५ |
| 7. काव्यानां निहिता अभिप्रायाः | डॉ. सदाशिवकुमारद्विवेदी<br>रीडर, संस्कृतविभागः<br>काशी हिन्दू विश्वविद्यालयः, वाराणसी | ५१ |

| | | | |
|---|---|---|---|
| 8. | आत्मतत्त्वविमर्शः | डॉ. अशोककुमारः<br>संस्कृतशिक्षकः<br>डी.ए.वी. + 2 विद्यालयः<br>आरा (विहारः) | ६३ |
| 9. | महाकविकुमारदासस्य सौन्दर्यानुभूतिः | डॉ. त्रिलोचनप्रधानः<br>प्रोजेक्टफेलो, संस्कृतविभागः<br>काशी हिन्दू विश्वविद्यालयः, वाराणसी | ६७ |




# रसगङ्गाधरे रसनिष्पत्तिः

आचार्यरेवाप्रसादद्विवेदी

रसगङ्गाधरे पण्डितराजः ऊचिवान् ध्वनेः पञ्चविधत्वम्। अभिधामूलस्य रसवस्त्वलङ्कारात्मना त्रैविध्यम्, लक्षणामूलस्य योऽर्थान्तरसंक्रमितवाच्य-त्वेनात्यन्ततिरस्कृतवाच्यत्वेन च द्वैविध्यमिति मेलनेन पञ्चविधत्वम्। एषु रसध्वनिर्जगन्नाथेन परमं रमणीय इति घोषितः। रसध्वनेश्चात्मा रस इति तस्य निरूपणं प्रथमं व्यधायि। तत्रास्य स्वकीयं सिद्धान्तभूतं मतमेवंविधम्–

(1) समुचितललितसन्निवेशचारुणा काव्येन[1] समर्पितैः[2]

(2) सहृदयहृदयं प्रविष्टैः[3]

तदीयसहृदयतासहकृतेन भावनाविशेषमहिम्ना विगलितदुष्यन्त–रमणीत्वादिभि-रलौकिक–विभावानुभावव्यभिचारिशब्दव्यपदेश्यैः शकुन्तलादिभिरालम्बनकारणैः, चन्द्रिकादिभिरुद्दीपनकारणैः, अश्रुपातादिभिः कार्यैः, चिन्तादिभिः सहकारिभिश्च सम्भूय प्रादुर्भावितेनालौकिकेन व्यापारेण[4] तत्कालनिवर्त्तितानन्दांशाऽऽवरणाज्ञानेन, अत एव प्रमुष्टपरिमित–प्रमातृत्वादिनिजधर्मेण प्रमात्रा[5] स्वप्रकाशतया वास्तेवन[6] निजस्वरूपानन्देन सह[7] गोचरीक्रियमाणः प्राग्विनिविष्ट[8] -वासनारूपो रत्यादिरेव रसः।

इत्थं चाभिनवगुप्त–मम्मटभट्टादि-ग्रन्थस्वारस्येन-भग्नावरणचिद्विशिष्टो रत्यादिरेव रसः।

(अत्र पण्डितराजकृतं शोधनम्) वस्तुतस्तु 'रत्याद्यवच्छिन्ना भग्नावरणा चिदेव रसः।' (पृ.27 पं.9)

एवं 1. चिद्विशिष्टः स्थायी रस इति भरतादयः।

2. स्थायिविशिष्टा चिद् रस इति च पण्डितराजः।

## अथ पूर्वपक्षमतानि

एषु प्रथमो भट्टनायकस्य भोगवादः। तत्र पूर्वपक्षत्वे प्रमाणं 'नव्यास्त्विति' प्रतिवन्दीमतम्। तथा हि भट्टनायकमते शकुन्तलादीन् प्रति दुष्यन्तभिन्नानामस्मदादीनां

प्रवृत्तिर्न संभवति, दृश्यते च सेति कोऽत्र सुविषमे धर्मसंकटे हेतुरिति-(नैतिकताप्रश्नः)।

भट्टनायकोऽत्र 'दोषविशेषस्तन्त्रमि'ति प्रतिपद्यते। एतस्य फलं तन्मते शकुन्तलादीनां साधारण्येनोपस्थापनम्। अभिनवादिभिरपीदं स्वीकृतचरम्।

**अत्र प्रतिवादी प्रतिपक्षमुपस्थापयति–**

दोषविशेषेण शकुन्तलादिषु साधारण्यमुत्पाद्यते चेत् तेनैव सामाजिकात्मसु दुष्यन्तत्वाद्यभेदोऽप्युत्पादयितुं शक्यत'इति। अर्थाद् दोषविशेषादसाधारण्यमपि न समुत्पाद्यते। अथाऽसाधारण्योत्पत्तिपक्षे सौष्ठवमपि। तथाहि यदि शकुन्तलादीनां साधारण्यं क्रियते तर्हि किन्निमित्ता भविष्यति दुष्यन्तादीनां तां प्रति प्रवृत्तिः, दुष्यन्तप्रवृत्तेः पूर्वं शकुन्तलायाः यद् दर्शनं तत्क्षणेऽपि नास्त्येव दुष्यन्तभिन्नानां प्रवृत्तौ किमपि बाधकम् इति दुष्यन्तप्रेयसीत्वप्रतिपत्तेः परमपि 'दुष्यन्तेनाहितं तेज' इति दिव्याया वाण्याः पूर्वं यावत् कथं न तां प्रति सामान्यात्वप्रतिपत्तिः। नाऽस्ति तत्र कस्यापि बाधकस्य सद्भावः कन्यां प्रति वराणामिव। अनेके हि भवन्ति स्वयंवरसभायां कमितारः कन्यायाः।

असाधारण्योत्पत्तिकल्पे पुनर्द्वितयमपि सुरक्षितं शकुन्तालादीनां सुरूपत्वम्, द्रष्टॄणां तां प्रति प्रवृत्त्यवकाशश्च प्रत्युत क्षुद्रेऽपि द्रष्टरि दुष्यन्तत्वाद्युत्पत्तिस्तस्योत्कर्षः।

कल्पिते दुष्यन्तत्वे कल्पिता रतिरपि तेन दोषेणोत्पाद्येत साक्षिचैतन्यजनितो भोगश्च। अथापि भोग एव वास्तवकोटिं न त्यजेद् अनास्वाद्यताप्रसक्तिम्। कथमिति चेद् भोक्तृचित्तगतया वास्तविक्या रत्या सह प्रातिभासिक्यास्तस्या अभेदग्रहात्।

एवं 'दोषविशेष'–कल्पनमाश्रितः साधारण्यपक्ष इव असाधारण्यपक्षोऽपि न दुर्बलः। ततश्च–'यत्रोभयोः समो दोष' इति न्यायादुभयस्य त्याज्यत्वमेव प्राप्तसमसंख्याकमतयोरिव प्रत्याशिनोर्निर्वाचनसङ्करे। दोषविशेषे कल्पिते सामाजिकस्य मानसो दुष्यन्ताद्यभेदबोधोऽपि सर्वंसहप्रक्रिय इति बोधपक्षोऽपि पूर्वपक्षकोटावेव प्रविष्टः। एवं परेषामपि मतानां पूर्वपक्षकोटिप्रवेशादभिनवगुप्तादिमतस्यैव सिद्धान्तमतत्वमायाति, तत एव तमेवादाय सूत्रमपि प्रवृत्तं 'समुचित–रत्यादिरेव रस' इति। तत्र पण्डितराजस्य मते चिदंशस्य समावेशो नूतनः। तस्यैव विशेष्यत्वेन ग्रहे 'स्थाय्यादिविशिष्टा चिदेव रस' इति पण्डितराजमते सिद्धान्तमतत्वमवसीयेत।



## सन्दर्भाः

1. काव्येन नाट्यमपि गृह्यते नाट्यशास्त्रे नाट्यपुस्तकस्य काव्यपुस्तकत्वेनैवादित आन्तं व्यपदिष्टत्वात्। अकाव्यसमर्पितत्वे तु न काव्यरसत्वमिति भावः।

2. समर्पितत्वं शाब्दबोधात्मना काव्ये, शुक्तिरजतादिन्यायेन च नाट्ये प्रत्यक्षात्मना निवेदितैः।

3. सहृदयहृदयं प्रविष्टैः. . . संभूय प्रादुर्भावितेनालौकिकेन व्यापारेणेत्यत्रान्वयः।

4. अलौकिको लोकेऽन्यत्रानुपलभ्यत्वेन। व्यापारश्चासौ व्यञ्जनेति ध्वनिवादिनः, परामर्श इति नैयायिकाः, अन्ये चान्यरूप इति तत्तन्मतपरतया नेयः।

5. प्रमातृ चात्र सामाजिकस्य प्रत्यक्चैतन्यम्। तद्गत आनन्दांशे यद् आवरणरूपमज्ञानम्। अलौकिकस्य व्यापारस्येदं द्वितयं फलम्–1. रत्यादेर्गोचरीकरणम्, 2. प्रमातुश्च परिमितप्रमातृत्वादिपरिमोषः।

6. वास्तवो हि निजस्वरूपरूप आनन्दः, न तु प्रातिभासिकः।

7. सहेति निजस्वरूपरूपानन्देन। रत्यादिबोधेन सह निजस्वरूपस्यानन्दांशस्यापि गोचरक्रियायां साहचर्यम्।

8. प्रमातरि संस्काररूपेण प्राग्विनिविष्टो रत्यादिरेव रसः, न तु नायकादिषु अनुमीयमानः स इत्यर्थः।

# संस्कृतप्रसारपरिषद्, आरा

## संक्षिप्तम् इतिवृत्तम्

- स्थापनातिथिः 22.2.1987
- निबन्धनसंख्या 424/1994-95
- कार्यालयः संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम्, प्रकाशपुरी, आरा (बिहारः) 802301
- आरण्यकम् (अर्धवार्षिकं संस्कृतशोधपत्रम्, प्रतिवर्षं मार्च, सितम्बरमासयोः प्रकाश्यमानम्)
- पञ्जीकरणसंख्या - RNI 58951/94
- संस्कृतविदुषां सम्मानः (प्रतिवर्षं क्रियमाणः)। अथ सम्मानिताः विद्वांसः-

| | सम्मानवर्षम् |
|---|---|
| 1. पण्डित कमलाकान्त उपाध्यायः | 1988 |
| 2. पण्डित चन्द्रशेखर पाठकः | 1989 |
| 3. पण्डित सीताराम उपाध्यायः | 1989 |
| 4. पण्डित सभानाथ पाठकः | 1990 |
| 5. पण्डित रङ्गनाथ पाण्डेयः | 1990 |
| 6. पण्डित रामेश्वरनाथ पाठकः | 1992 |
| 7. पण्डित केदारनाथ शुक्लः | 1993 |
| 8. पण्डित जनार्दन मिश्रः | 1994 |
| 9. पण्डित रामनरेश त्रिपाठीः | 1995 |
| 10. पण्डित रामनारायण पाण्डेयः | 1995 |
| 11. पण्डित रामप्रवेश त्रिपाठीः | 1996 |
| 12. पण्डित गिरिजानन्दन मिश्रः | 1997 |
| 13. पण्डित अम्बिकादत्त त्रिपाठी 'व्यास' | 1998 |
| 14. पण्डित डॉ. श्यामानन्द झा | 1999 |
| 15. पण्डित वज्रभूषण मिश्र 'आक्रान्तः' | 2000 |
| 16. पण्डित जगदीश्वर प्रसाद मिश्र 'नलिनः' | 2000 |
| 17. पण्डित जयानन्द मिश्रः | 2001 |
| 18. पण्डित वृन्दावन त्रिपाठी | 2003 |

- प्रकाशितानि - 12 पुस्तकानि (विवरणं शोधपत्रस्य पृष्ठभागे)
- संस्कृतकविगोष्ठी-संस्कृतविचारगोष्ठीनाम् आयोजनम्
- संस्कृतसम्भाषणशिविराणाम् आयोजनम्
- महाविद्यालय/उच्च-मध्य-प्राथमिकविद्यालयस्तरीय-संस्कृतप्रतियोगितानाम् आयोजनम्
- वर्ष 2000 तः 'अन्नपूर्णादेवीस्मारिका संस्कृतप्रतियोगिता' द्वारा प्रतियोगितापुरः सरं पुरस्कार-प्रमाणपत्रादिवितरणम्।
- संस्कृतवर्षम् (1999-2000) उपलक्ष्य केन्द्रसर्वकारस्य अनुदानेन संस्कृतशिक्षक-प्रशिक्षणवर्ग - 51 संस्कृतसम्भाषणशिविर-संस्कृतसङ्गम् (14 अप्रैल, 2000) इति संस्कृतसम्भाषण-अभियानसञ्चालनम्।

❖



# आधुनिके सन्दर्भे रामायणीया राजनैतिकी मूल्यावधारणा

**डॉ. कामेश्वर शुक्लः**

रामायणस्य अनुशीलनेन एतद् विस्पष्टतया ज्ञायते यत् भारतदेशः तदानीं नैकेषु लघुलघुराज्येषु विभक्त आसीत्। अयोध्याभिधं राज्यमपि एकं जनपदीयशासनमासीत्। राजा राज्यस्य प्रमुख आसीत्, किन्तु राजैव राज्यं नासीत्। राष्ट्ररञ्जनं प्रजारञ्जनञ्चास्य सर्वोत्कृष्टं राजनैतिकं मूल्यमासीत्। **स्वराष्ट्ररञ्जनम्**[1], **महाराष्ट्रविवर्धनम्**[2] इति शब्दद्वयं व्यवहृत्य वाल्मीकिना अस्य महत्त्वं प्रकाशितमस्ति। राजानम् ऋते सर्वाधिकं महत्त्वपूर्णं पदं पुरोहितस्य आसीत्। साधारणतः राजपुरोहितः सर्वोच्चपरामर्शदाता बभूव। पुरोहितोऽपि महाप्राज्ञः वेदवेदाङ्गनिष्णातः आचारवान् धर्मप्राणश्च बभूव। राज्ञः दशरथस्य राज्ये धृष्टिः, जयन्तः, विजयः, सुराष्ट्रः, राष्ट्रवर्धनः, अकोपः, धर्मपालः, सुमन्त्रश्चेति अष्टौ यशस्विनः शुचयः अनुरक्ताश्च अमात्याः आसन्। तथाहि–

**अष्टौ बभूवुर्वीरस्य तस्यामात्या यशस्विनः।**
**शुचयश्चानुरक्ताश्च राजकृत्येषु नित्यशः।।**
**धृष्टिर्जयन्तो विजयः सुराष्ट्रो राष्ट्रवर्धनः।**
**अकोपो धर्मपालश्च सुमन्त्रश्चाष्टमोऽभवत्।।**[3]

वसिष्ठवामदेवौ प्रधानपुरोहितौ आस्ताम्। राजपरिषदि राज्ञे परामर्शदातारः उपर्युक्ताः अष्टौ अमात्याः तथा च वसिष्ठवामदेवसहिताः सुयज्ञ–जाबालि–काश्यप–गौतम–मार्कण्डेय–कात्यायनाः इत्यष्टौ मन्त्रिणः आसन्। यथोक्तं–

**ऋत्विजौ द्वावभिमतौ तस्यास्तामृषिसत्तमौ।**
**वसिष्ठो वामदेवश्च मन्त्रिणश्च तथाऽपरे।।**
**सुयज्ञोऽप्यथ जाबालिः काश्यपोऽप्यथ गौतमः।**
**मार्कण्डेयस्तु दीर्घायुस्तथा कात्यायनो द्विजः।।**[4]

मन्त्रिणोऽपि सुयोग्याः विनीताः कर्मकुशलाः जितेन्द्रियाः शस्त्रज्ञाः तेजस्विनः

क्षमाशीलाः कर्तव्यपरायणाश्च बभूवुः। तदेवं सर्वगुणसम्पन्नानामुदारचरितानां राज्ञः राज्यस्य च कृते सर्वस्वत्यागिनां मन्त्रिणामादर्शाः सदा प्रतिष्ठिताः बभूवुः।[5] मन्त्रिणाम् अमात्यानां च राजनीतिकं मूल्याधायकं गुणरत्नत्रयम् आधुनिके सन्दर्भे सर्वथा प्रासङ्गिकमित्यत्र न स्यात् कापि विप्रतिपत्तिः। अवश्यं महाभारते किन्तु अमात्यानां संख्या सप्तत्रिंशत्, मन्त्रणायै मन्त्रिणाञ्च संख्या तिस्रः पञ्च अष्ट वा निर्धारिता परिलक्ष्यते।[6] मन्त्रिणः तथा च अमात्या इव राज्ञोऽपि भृत्याभरणं प्रजापालनं धर्मपूर्वकम् अर्थादानं चेति त्रिविधं प्रधानं कार्यं वर्णितमधिगम्यते। तथाहि–

**भृत्यानां भरणात् सम्यक् प्रजानां परिपालनात्।**
**अर्थादानाच्च धर्मेण पिता नस्त्रिदिवं गतः।।**[7]

भरतस्य इयमुक्तिः उक्तं संदेशमेव प्रसारयति। वस्तुतस्तु प्रसङ्गेऽस्मिन् वाल्मीकिना प्रयुक्तः **राजवृत्तम्** इति शब्दः प्रणिधानयोग्यः। राजवृत्तानि चतुर्विधानि भवन्ति। तद्यथा–न्यायेन अर्थस्य उपार्जनम्, तस्य संवर्द्धनम्, संरक्षणम्, सदुपयोगश्चेति। वसिष्ठाश्रमे समुपस्थितं राजानं विश्वामित्रं प्रति ब्रह्मर्षेः अयं प्रश्नः एतदेव सूचयति। तथाहि–

**कच्चित्ते कुशलं राजन् कच्चिद् धर्मेण रञ्जयन्।**
**प्रजाः पालयसे राजन् राजवृत्तेन धार्मिक।।**[8]

राज्ञः प्रजानाञ्च व्यवहाराचाराणां पारस्परिकप्रभावसम्बन्धेऽपि सम्यक् वर्णनमुपलभ्यते। राजा खलु धर्मार्थकामानाम् उत्तमो निधिः। धर्मस्य शुभस्य पापस्य च मूलं राजैव। अतः राज्ञः चारित्रिकः प्रभावः प्रजासु अवश्यम्भावीति कविवरस्य उद्घोषः। तद्यथा–

**राजा धर्मश्च कामश्च द्रव्याणां चोत्तमो निधिः।**
**धर्मः शुभं वा पापं वा राजमूलं प्रवर्तते।।**[9]

अपि च–

**यद्वृत्ताः सन्ति राजानः तद्वृत्ताः सन्ति हि प्रजाः।।**[10]

श्रीमद्भगवद्गीतायाः **यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः** तथा च **यथा राजा तथा प्रजाः** इत्यस्याः उक्तेः लोकोक्तेश्च बीजमत्र उपलब्धव्यम्।

वाल्मीकिरामायणस्य परिशीलनेन अधोलिखितानि राजनीतिकमूल्यानि दृग्गोचरतामायान्ति–

1. दक्षैः शुचिभिश्च चरैः गुप्तसूचनासंग्रहः।
2. अपराधानुसारं दण्डविधानम्।



3. समग्रे राष्ट्रे शान्तेः स्थापनम्।
4. राज्ञः, तस्य मन्त्रिणाम् अमात्यानाञ्च नयचक्षुषा जागरणम्।
5. मन्त्रसंवरणशक्तिः (अर्थात् गुप्तविषयाणां गोपनीयतया संरक्षणसामर्थ्यम्)।
6. धर्मपूर्वकं प्रजापालनम्।
7. प्रजानामुत्पीडनं विना राजकोशस्य संवर्द्धनम्।
8. उपयुक्तजनानाम् उपयुक्तकार्येषु नियोजनम्।
9. आनुपूर्वी (Warrant of Precedence)
10. कर्मचारिभ्यः प्रदत्तकार्यस्य निष्पादने तेषाम् आत्मविवेकस्य उपयोगः स्वाधिकारक्षेत्रे।[11]

अधुना अस्माकं देशे राष्ट्रविरोधितत्वानि सक्रियतया वर्धमानानि सन्ति। मन्मतेन राष्ट्रवर्धनात्मकम्, प्रजारञ्जनात्मकञ्च मूल्यद्वयं सुतरां प्रासङ्गिकम्। निष्ठया अनयोः स्वीकरणेन तत्साधनानां समुचितप्रयोगेण सद्व्यवहारेण च राष्ट्रविरोधितत्त्वानि अवश्यं निर्मूलानि स्युः।

किञ्च एतेषु प्रत्येकमपि आधुनिके सन्दर्भे सर्वथा प्रासङ्गिकमिति मे द्रढीयान् विश्वासः। उदाहरणार्थं कतिपयानि अत्रोपस्थाप्यमानानि सन्ति।

तथाहि साम्प्रतिक्याः राजनीतेः एकं विशिष्टं मूल्यमस्ति **सत्याग्रहः** (धर्मघट, धरना वेति भाषायाम्)। द्वितीयं विशिष्टं मूल्यमस्ति आमरणान्तिकम् अनशनम् (भूखहड़ताल, Hunger strike, Hunger strike till death वेति भाषायाम्)। प्रसङ्गक्रमेण क्रान्तदर्शिना वाल्मीकिना विशिष्टमेतद् मूल्यद्वयमेव विनिर्दिष्टमस्ति। रामायणीयः प्रसङ्गस्तु ईदृशः। भरतः अग्रजं रामम् अयोध्यां प्रति नेतुं चित्रकूटं प्राप्नोति। तेन बहुधा निवेदितोऽपि रामः अयोध्यां यातुमुद्यतो न भवति। भरतः तदानीं सत्याग्रहस्य मार्गं समाश्रयते। यथोक्तं–

**इह तु स्थण्डिले शीघ्रं कुशानास्तर सारथे।**
**आर्यं प्रत्युपवेक्ष्यामि यावन्मे सम्प्रसीदति।।**
**निराहारो निरालोको धनहीनो यथा द्विजः।**
**शये पुरस्ताच्छालायां यावन्मां प्रतियास्यति।।**[12]

अत्र वाल्मीकिना **प्रत्युपवेशनम्** इति शब्दस्य प्रयोगः सत्याग्रहार्थे एव विहितोऽस्ति। एवमेव सुग्रीवेण निर्धारितस्य समयावधेः समाप्तेरनन्तरं सीतायाः अन्वेषणे असमर्थाः वानराः आमरणान्तिकम् अनशनं विधाय प्राणोत्सर्गाय उद्यताः भवन्ति। अस्मिन् स्थले अनशनार्थे कविवरः इदम्प्रथमतया **प्रायोपवेशनम्** इति

शब्दं व्यवहरति। तथाहि–

**अस्मिन्नतीते काले तु सुग्रीवेण कृते स्वयम्।**
**प्रायोपवेशनं युक्तं सर्वेषां च वनौकसाम्।।**[13]

परवर्तिकालेऽपि **पञ्चतन्त्रे** 4, **रघुवंशमहाकाव्ये** 8/94, **वेणीसंहारनाटके** च शब्दोऽयं अस्मिन्नेव अर्थे प्रयुक्तो दृश्यते। अस्य प्रत्युपवेशनस्य अर्थात् सत्याग्रहस्य, प्रायोपवेशनस्य अर्थात् अनशनस्य सर्वाधिकः प्रयोगः महात्मागान्धिमहोदयेन कृतः साफल्यञ्चाधिगतम्। अधुनाऽपि लोकाः समधिकतया अनयोः प्रयोगं व्यवहारं वा कुर्वाणाः स्वीयमभीप्सितञ्च साधयन्तः संलक्ष्यन्ते। अतः रामायणीयराजनीतेः सम्प्रति प्रासङ्गिकता नास्तीति न केनापि अपलपितुं शक्यते।

अस्मिन् प्रसङ्गे हनूमत्सुग्रीवयोः संभाषणे अपरमपि यत् राजनीतिकं मूल्यं लभ्यते तदपि आधुनिके सन्दर्भे सुतरां प्रासङ्गिकमिति मे मतिः। तथाहि अङ्गदेन प्रस्तावितः अनशनस्य अर्थात् प्रायोपवेशनस्य प्रस्तावः तारस्य नेतृत्वे सर्वैरपि श्रेष्ठवानरैः समर्थितः। यतोहि तेषां भयमासीत् यत् सीतायाः अन्वेषणे अशक्तान् अस्मान् सर्वान् अपि रामसुग्रीवौ मृत्युदण्डेन दण्डयिष्यतः। सर्वथा शोचनीया अवस्था संवृत्ता। तदा हनूमता विचिन्तितं यत् एवं कृते सति वानरेषु महद् वैमनस्यं संभवेत्। तारप्रभृतीनां साहाय्येन अङ्गदः राज्यमधिकुर्यात्, सुग्रीवश्च राज्याद् वञ्चितो भवेत्। हनूमतः अस्याः आशङ्कायाः गभीरं रहस्यमासीत्। तारः कश्चन साधारणः वानरः नासीत्। असौ ताराधिपतिः चन्द्र इव तेजस्वी आसीत्। अङ्गदोऽपि बुद्धेः अष्टाङ्गैः, चतुर्भिः बलैः, चतुर्दशभिः गुणैश्च संपन्न आसीत्। किष्किन्धाकाण्डस्य चतुश्चत्वारिंशे अध्याये सुग्रीवेण हनूमतः यत् वैशिष्ट्यं प्रतिपादितमस्ति, तदनुसारं पृथिव्याम्, अन्तरिक्षे, आकाशे, देवलोके, जले च सर्वत्र हनूमतः निर्बाधिता गतिरासीत्। असुर-गन्धर्व-नाग-मनुष्य-देवता-समुद्रसहितानां समस्तलोकानां तस्य ज्ञानमासीत्। गति-वेग-तेजोलाघवादिषु न कोऽपि तस्य साम्मुख्यं कर्तुं समर्थ आसीत्। एतत् सर्वं परिज्ञायैव रामेण तेभ्यः नेतृत्वं प्रदत्तमासीत्। तेषु सीतान्वेषणरूपः महान् भारः विन्यस्त आसीत्, युद्धारम्भात् प्राक् शान्तिदूतरूपेण च लङ्कां प्रति अङ्गदः संप्रेषित आसीत्। अङ्गदतारयोः विषये हनूमान् सुपरिचितः आसीत्। अतएव सः भेदनीतेः प्रयोगेण वानरान् विभाजयति। पुनश्च दण्डनीतेः प्रयोगेण अङ्गदं भीषयित्वा सीतान्वेषणाय सर्वान् समुत्साहयति। अन्ते पुनः सामदामबलयोः प्रयोगेण बहुप्रकारैः अङ्गदं बोधयति। किन्तु हनूमतः धर्मसम्मतान् विनययुक्तान् परामर्शान् सयुक्तिकं खण्डयित्वा अङ्गदः प्रायोपवेशनायैव निश्चयं करोति। अन्ते अवश्यं सम्पातेः पदार्पणेन तस्य मनोभावः परावर्तितो भवति।



कस्तावत् कस्मिन् कर्मणि नियोक्तव्यः, कस्मै कीदृशं दायित्वं प्रदेयमिति रामायणीयमुल्लेखयोग्यं ग्रहणीयञ्च राजनीतिकं मूल्यमस्ति। वाल्मीकेरनुसारं प्रधान-मध्यम-जघन्यभेदैः कार्यं त्रिविधं भवति। कार्यकर्तारोऽपि त्रिविधाः भवन्ति। मुख्यजनाः मुख्यकार्येषु, मध्यमाः मध्यमकार्येषु, जघन्याश्च जघन्यकार्येषु नियोजनीया इति रामायणीयः सन्देशः। तथाहि–

**कच्चिन्मुख्या महत्स्वेव मध्यमेषु च मध्यमाः।**
**जघन्याश्च जघन्येषु भृत्यास्ते तात योजिताः।।**[14]

अशोकवनिकायां विध्वस्तायां, लङ्कादाहे कृते, बहुषु शूरेषु च निहतेषु स्वीयैः मन्त्रिभिः सह मन्त्रयन् दशाननोऽपि किञ्चित् तथैवाभिधत्ते–

**त्रिविधाः पुरुषा लोके उत्तमाधममध्यमाः।**
**तेषां तु समवेतानां गुणदोषौ वदाम्यहम्।।**[15]

तदेवम् उपयुक्तस्य उपयुक्तकर्मणि नियोगः सर्वेषां हिताय कल्पते। साम्प्रतिकं शासनतन्त्रं बहुत्र बहुषु क्षेत्रेषु निष्फलं भवति तत्र अयमेव हेतुः। रामायणीय-राजनीतेः इदं मूल्यं संस्मरतः साम्प्रतिकीं व्यवस्थाञ्च पश्यतो मे नीतिसारस्य एकं पद्यं स्मृतिपथमारोहति–

**छेदश्चन्दनचूतचम्पकवने रक्षा करीरद्रुमे**
**हिंसा हंस-मयूर-कोकिलकुले काकेषु नित्यादरः।**
**मातङ्गेन खरक्रयः समतुला कर्पूरकार्पासयो-**
**रेषा यत्र विचारणा गुणिगणे देशाय तस्मै नमः।।**(नीतिसारः 6)

अमात्यानां शुचितां वर्णयन् आदिकविः उपधातीतान् अर्थात् ये खलु उत्कोचं (घूस, Bribe इति भाषायां) न गृह्णन्ति, तादृशान् अमात्यान् प्रशंसति, तेषामेव नियोजनाय सन्दिशत्यपि। तथाहि-

**एकोऽप्यमात्यो मेधावी शूरो दक्षो विचक्षणः।**
**राजानं राजपुत्रं वा प्रापयेन्महतीं श्रियम्।।**
**अमात्यानुपधातीतान् पितृपैतामहाञ्शुचीन्।**
**श्रेष्ठाञ्श्रेष्ठेषु कच्चित्ते नियोजयसि कर्मसु।।**[16]

वाल्मीकिरामाणस्य अयोध्याकाण्डे **उग्रप्रतिग्रहीता, सम्प्राप्तकालं दातव्यम्** इति शब्दाः लभ्यन्ते। राजकीयशुल्कस्य संग्रहे यः उग्रतां प्रदर्शयति स एवात्र उग्रप्रतिग्रहीतापदवाच्योऽस्ति। प्रजाभ्यः राजकीयशुल्कस्य (करस्येति भावः) संग्रहावसरे मध्यमस्य मार्गस्य अनुसरणाय वाल्मीकिना परामृष्टमस्ति। उग्रतया राजकीयशुल्क–

संग्रहः राज्ञः विरुद्धं प्रजासु क्षोभोद्वेगौ जनयतीति विदितमेव मतिमतां तत्रभवताम् समेषाम्। तथाहि–

**कच्चिनोग्रेण दण्डेन भृशमुद्वेजिताः प्रजाः।**
**राष्ट्रे तवावजानन्ति मन्त्रिणः कैकयीसुत।।**
**कच्चित् त्वां नावजानन्ति याजकाः पतितं यथा।**
**उग्रप्रतिग्रहीतारं कामयानमिव स्त्रियः।।**[17]

किञ्च, सम्प्राप्तकालं दातव्यम् इत्यनेन वाल्मीकिना राजकीयसैनिकेभ्यः अन्यकर्मचारिभ्यश्च प्रदेयं मासिकं वेतनं, तैः प्राप्यम् अन्यद् धनं चेति यथाकालं दातव्यमिति निर्दिष्टमस्ति। तद्यथा–

**कच्चिद् बलस्य भक्तं च वेतनं च यथोचितम्।**
**सम्प्राप्तकालं दातव्यं ददासि न विलम्बसे।।**
**कालातिक्रमणे ह्येव भक्तवेतनयोर्भृताः।**
**भर्तुरप्यतिकुप्यन्ति सोऽनर्थः सुमहान् कृतः।।**[18]

कर्मचारिभ्यः विलम्बेन वेतनप्रदानं कियद् घातकम् अनर्थकरञ्च भवतीति वयं शिक्षकाः शिक्षकेतर–कर्मचारिवर्गश्च सम्यक् अवगच्छामः। अतः वाल्मीकेरयं राजनीतिकः उद्घोषः सन्देशो वा प्रासङ्गिको भवति न वेति परिशीलनीयमस्माभिः। यदा कस्मिंश्चित् राजकीयसमारोहे भिन्न-भिन्न-स्तराणां लोकाः सम्मिलिताः भवन्ति, तदानीं तेषाम् आसनानामेका सुनिश्चिता आनुपूर्वी भवति **आनुपूर्वी** अर्थात् समारोहे समवेतानां प्राधान्यानुसारम् आसनानाम् एकः क्रमो भवति। अद्यत्वे अयमेव क्रमः **आनुपूर्वी** अर्थात् Warrant of precedence इति कथ्यते। महर्षिणा वाल्मीकिना अस्मिन् अर्थे **आनुपूर्व्यम्** इति शब्दः प्रयुज्यते। गुरुणा वसिष्ठेन अन्यैः मन्त्रिभिश्च सार्धं यदा भरतः मुनेः भरद्वाजस्य आश्रमं प्राप्नोति तदा तत्र मुनिवरः भरद्वाजः प्राथम्येन वसिष्ठस्य, तदनु भरतस्य, तदनु प्राधान्यक्रमेण अन्येषां च स्वागतं व्याहरति। **"आनुपूर्व्याच्च धर्मज्ञः पप्रच्छ कुशलं कुले"** (वा.रा., अयो.90.6)। इत्यनया उक्त्या वाल्मीकिना आनुपूर्व्या एव सन्देशः प्रदीयते। एकस्मिन् अन्यस्थलेऽपि तेन उच्यते–

**आनुपूर्व्यान्निषेदुश्च सर्वे मन्त्रिपुरोहिताः।**
**ततः सेनापतिः पश्चात् प्रशस्ता च न्यषीदत।।** (वा.रा.अयो., 91.40)

अद्यापि अस्मदीये देशे इयमानुपूर्वी संविधानसम्मता समस्ति। अस्याः व्यवस्थायाः अनुरूपमेव अद्यापि राष्ट्रपतेः, तदनु प्रधानमन्त्रिणः स्थानं भवति। वाल्मीकेः राजनीतौ



अधिकारिभ्यः तदेव प्राधान्यं महत्त्वञ्च प्रदत्तमासीत् यत् प्रधान्यं महत्त्वञ्च सम्प्रति अस्मदीये शासनतन्त्रे प्रदत्तमस्ति। हनूमति सीतायाः अन्वेषणस्य भारं विन्यस्य सुग्रीवेण तस्मै अयम् अधिकारः प्रदत्तः यत् केनोपायेन, केन विधिना, कया रीत्या वा कार्यं सेत्स्यतीति सः स्वयं निर्णयं कुर्यात्। अयमेवास्ति विवेकजः अधिकारः, प्रशासनस्य अनिवार्यं तत्त्वम्। किञ्च सीतां वीक्ष्य लङ्काञ्च विदाह्य हनूमदङ्गदौ सीतां गृहीत्वैव रामस्य सविधे गन्तुमभिलषतः तदा कपिवृद्धः जाम्बवान् तयोः विरोधं कुर्वन् तौ ज्ञापयति यत् अस्मभ्यं सीतायाः अन्वेषणस्यैव दायित्वं प्रदत्तमस्ति न पुनः तस्याः आनयनस्य। तथाहि–

**विचेतुं वयमाज्ञप्ता दक्षिणां दिशमुत्तमाम्।**
**नानेतुं कपिराजेन नैव रामेण धीमता।।** (वा.रा.सु., 50.15-16)

अधिकारिभिः कर्मचारिभिश्च स्वाधिकारक्षेत्रं नातिक्रमणीयमिति वाल्मीकेः सन्देशः अद्यापि प्रासङ्गिक एव।

चित्रकूटे रामेण भरतः विविधान् प्रश्नान् पृच्छ्यते। तेषु प्रश्नेषु रामायणीयराजनीतेः मूल्याधायकानि नैकानि अधुनाऽपि सर्वथा प्रासङ्गिकानि तत्त्वानि प्राप्यन्ते। मन्त्रणा एव विजयस्य मूलमिति रामस्याभिमतम्। यथोक्तं–**मन्त्रो विजयमूलं हि राज्ञां भवति राघव**[19] इति। मन्त्रणासु गुप्तासु सतीष्वेव गुप्तकार्याणि सिद्धानि किं वा सफलानि भवन्ति। गोपनीयतया मन्त्रणानाञ्च संरक्षणस्य दायित्वं मन्त्रिणामेव भवति। अत एव अद्यापि मन्त्रिणः मन्त्रित्वस्य शपथं गृह्णन्ति। **मन्त्रो विजयमूलं हि** इति रामायणीयं वाक्यमेव अस्याः व्यवस्थायाः आदितत्त्वम्। कश्चन गूढः गभीरो वा विषयः एकाकिना बहुभिः सार्धं वा विचारणीयो न भवति। बहुभिः सह मन्त्रिता मन्त्रणा सुगुप्ता न तिष्ठति। तथाहि–

**षट्कर्णो भिद्यते मन्त्रस्तथा प्राप्तश्च वार्त्तया।**
**इत्यात्मना द्वितीयेन मन्त्रः कार्यो महीभृता।।**[20]

हितोपदेशे उपदिष्टस्य बीजं रामायणीये सदर्भेऽस्मिन् मृग्यम्। तद्यथा–

**मन्त्रभेदे हि ये दोषा भवन्ति पृथिवीपतेः।**
**न शक्यास्ते समाधातुमिति नीतिविदां मतम्।।**[21]

एतद् आधारीकृत्यैव राज्याध्यक्षाणां मध्ये अतिमहत्त्वपूर्णः गभीरतरश्च विषयः द्वयोर्मध्ये एव मन्त्रितो जायते। उत्तमाधममध्यमरूपेण मन्त्रणाऽपि त्रिविधा भवतीति रावणस्य मतम्। तथाहि–

**एवं मन्त्रोऽपि विज्ञेय उत्तमाध्यममध्यमः**[22] अर्थशास्त्रस्य मन्त्राधिकारप्रकरणे

कौटिल्योऽपि त्रिभिश्चतुर्भिर्वा मन्त्रिभिः सार्धं मन्त्रिणां मन्त्रणामेव समर्थयति।

सेनाप्रमुखानां राजदूतानाञ्च नियोग-सन्दर्भे रामायणीया या अवधारणा साऽपि उल्लेखयोग्या। शूरवीरः, अनुरक्तः, बुद्धिमान्, धैर्यवान्, शुचिः, दक्षश्च जनः सेनाप्रमुखपदे, अपि च स्वदेशवासी, विद्वान्, दक्षः, प्रतिभाशाली, यथोक्तवादी च जनः राजदूतपदे नियोक्तव्य इति वाल्मीकीयः राद्धान्तः। यथोक्तं अयोध्याकाण्डे-

**कच्चिद् धृष्टश्च शूरश्च धृतिमान् मतिमान् शुचिः।**
**कुलीनश्चानुरक्तश्च दक्षः सेनापतिः कृतः।।**
**कच्चिज्जानपदो विद्वान् दक्षिणः प्रतिभानवान्।**
**यथोक्तवादी दूतस्ते कृतो भरत पण्डितः।।**[23]

अस्मिन् प्रसङ्गे महत्त्वपूर्णः योऽनुदेशः लभ्यते सोऽस्ति राजभृत्येषु राज्ञः दृष्टिः। येषु राजभृत्येषु राज्ञा दृष्टिर्देया ते राजभृत्याः रामायणे तीर्थपदवाच्याः बभूवुः। मन्त्रि-पुरोहित-युवराज-सेनापति-दौवारिक-अन्तर्वशिक-कारागाराध्यक्ष-कर्मान्तिक-धर्माध्यक्ष-दण्डपाल-दुर्गपाल-राष्ट्रसीमापाल-वनपालाश्चेति शत्रुपक्षस्य अष्टादश तीर्थानि। एतेषु मन्त्रि-पुरोहित-युवराजान् विहाय अन्ये पञ्चदश तीर्थान् स्वपक्षस्य तीर्थानि बभूवुः। शत्रुपक्षस्य अष्टादशसु तीर्थेषु स्वपक्षस्य पञ्चदशतीर्थेषु च प्रत्येकं तीर्थस्य उपरि त्रयाणां गुप्तचराणां माध्यमेन राज्ञा दृष्टिः रक्षणीया। तेषां गुप्तचराणां च विषये तत्तीर्थैः किमपि ज्ञातं न भवेत् इत्यपि मनसा अवधेयम्। यथोक्तम्-

**कच्चिदष्टादशान्येषु स्वपक्षे दशपञ्च च।**
**त्रिभिस्त्रिभिरविज्ञातैर्वेत्सि तीर्थानि चारकैः।।**[24]

राज्याध्यक्षेण प्रमुखेषु राजमार्गेषु सर्वसाधारणलोकाः साक्षात्करणीयाः इति वाल्मीकेः राजनैतिकी मन्त्रणा प्रणिधानयोग्या। प्रसङ्गेऽस्मिन् साक्षात्काराय मध्यममार्गावलम्बनमेवानुशंसितमस्ति। तद्यथा-

**कच्चिद् दर्शयसे नित्यं मानुषाणां विभूषितम्।**
**उत्थायोत्थाय पूर्वाह्णे राजपुत्र महापथे।।**
**कच्चिन्न सर्वे कर्मान्ताः प्रत्यक्षास्तेऽविशङ्कया।**
**सर्वे वा पुनरुत्सृष्टा मध्यमेवात्र कारणम्।।**[25]

तदेवमस्माभिः परिलक्ष्यते यत् रामायणीया राजनैतिकी मूल्यावधारणा अद्यापि प्रासङ्गिकी सर्वथोपयुक्ता ग्राह्या चास्ति। सर्वोदात्तभावसंवलितं मणिमयमादिकाव्यमिदं स्वसुरभिभिरद्यापि सुवासयति निखिलं जगत्। इति शम्।



## सन्दर्भाः

1. रामाभिषेकाभ्युदयं सर्वसैन्यविसर्जनम्।
स्वराष्ट्ररञ्जनं चैव. . . . . . . . .।। वा.रा.बाल. 3.38
2. तां तु राजा दशरथो महाराष्ट्रविवर्धनः।
पुरीमावासयामास दिवि देवपतिर्यथा।। वा.रा.बाल. 5.9
3. वा. रा. बाल. 7.2-3
4. वा. रा. बाल. 7.4-5
5. विद्याविनीता ह्रीमन्तः कुशला नियतेन्द्रियाः।
श्रीमन्तश्च महात्मानः शस्त्रज्ञा दृढविक्रमाः।।
कीर्तिमन्तः प्रणिहिता यथावचनकारिणः।। वा. रा. बाल. 7.6-7
6. म. भा., शान्ति 85. 7-11
7. वा. रा. अयो., 105.33
8. वा. रा. बाल., 52.7
9. वा. रा. अरण्य., 50.10
10. वा. रा. अयो., 109.9
11. वा. रा. बाल., 7.11-21
12. वा. रा. अयो., 111.13-14
13. वा. रा. किष्कि., 53.13
14. वा. रा. अयो., 110.25
15. वा. रा. युद्ध., 6.6
16. वा. रा. अयो., 100.24, 26
17. वा. रा. अयो., 100.27-28
18. वा. रा. अयो., 100.32-33
19. वा. रा. अयो., 100.16
20. हितो., विग्रहः., 38
21. हितो., विग्रहः 39
22. अर्थशा., मन्त्राधि.,
23. वा. रा. अयो., 100.30, 35
24. वा. रा. अयो. 100.36
25. वा. रा. अयो., 100.51-52

# किञ्चित् पारिभाषिकम्

**काशिकावृत्तौ अष्टाध्यायीगतानां सूत्राणां शब्दाः यथा परिभाषिताः तथा सूत्र–तत्संख्योल्लेखपुरःसरम् अध्यायक्रमेणात्र संगृह्यन्ते।**
**अ0 = अष्टाध्यायी। वा0 = वार्तिकम्**

बाहुल्यम् — पूर्वपदार्थधर्मः बाहुल्यम्।
अ.छाया बाहुल्ये 2.4.22

आदेशः — आदेशः कथनम्।

अन्वादेशः — अन्वादेशः अनुकथनम्। नेह पश्चादुच्चारणमात्रम् अन्वादेशः,एकस्यैवाभिधेयस्य पूर्वं शब्देन प्रतिपादितस्य द्वितीयं प्रतिपादनमन्वादेशः।
अ. इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ 2.4.32

पत्रम् — पतत्यनेन इति पत्रं वाहनमुच्यते।
अ. युग्यं च पत्रे 3.1.121

आवश्यकम् — अवश्यभावः आवश्यकम्।
अ.ओरावश्यके 3.1.125

असंमतिः/ — अविद्यमाना संमतिरस्मिन् इति असंमतिः।
समतिः — संमननं संमतिः, संगतता पूजा।
अ.प्रणाय्योऽसंमतौ 3.1.128

कर्म — त्रिविधं कर्म–निर्वत्यं विकार्यं प्राप्यं चेति। निर्वर्त्यम्–कुम्भकारः, नगरकारः। विकार्यम्–काण्डलावः। प्राप्यम् - वेदाध्यायः।
अ.कर्मण्यण् 3.2.1

तुन्दपरिमृजः — अलसः तुन्दपरिमृजः (तुन्दं परिमार्ष्टि)।
शोकापनुदः — सुखस्य आहर्ता शोकापनुदः (शोकम् अपनुदति)।
अ.तुन्दशोकयोः परिमृजापनुदोः 3.2.5

उद्यमनम् — उद्यमनम् उत्क्षेपणम्।
व्या.हरतेरनुद्यमनेऽच् 3.2.9

वयः — कालकृता शरीरावस्था यौवनादिः वयः।
का.वयसि च 3.2.10



# नासदीयसूक्ते
## वैदिकसृष्टितत्त्वस्य वैज्ञानिकानुशीलनम्

**परम्बा श्रीयोगमाया**

**उपक्रमः**

कुत आगतोऽयं मानवः? कुतो वा तस्य निवासस्थानभूतोऽयं ग्रहः? पुनश्च कुतो वा ग्रहाणां धारकः सूर्यः? एवं कथं वापरसूर्याणां जगतः गृहीत्वा विश्वमिदं संघटितम्? कुतः विश्वमिदं प्रादुर्भूतं तथा तत्पूर्वावस्था का? एते प्रश्नाः प्रकृतेः रहस्यानुसन्धाने स्वाभाविकाः। आधुनिकविज्ञानिनां लक्ष्यं तु प्रत्यहं प्रकृतेः नवविभावोन्मोचने सफलतार्जनम्।

बहुशताब्दानां प्राक् मानवेन विश्वोत्पत्तिः कदा तथा कथमिति–समस्याप्रश्नद्वयस्य समाधानमनुसन्धीयते। आधुनिकविज्ञानस्य प्रगतेः अनुसारं सृष्टिविज्ञानानुसन्धानमपि तीव्रगत्याभूत्। अणुविज्ञानस्य (Particle Physics) प्रगतिमाध्यमेन आधुनिकविज्ञानिभिः विश्वोत्पत्तेः विषये कतिपयानि सैद्धान्तिकतथ्यान्युपस्थाप्यन्ते।

यथाधुनिकविज्ञानं सम्भाव्यं सृष्टितत्त्वमुपस्थापयति किं तथैव किञ्चित् वर्णनं सर्वपुरातनवाङ्मये ऋग्वेदे वर्त्तते? पुनः यदि वर्त्तते तर्हि तस्य स्वरूपं किम्? आधुनिकविज्ञानेन सह तस्य समन्वयः वर्त्तते न वा? पुनः यदि कश्चित् भेदः वर्त्तते तर्हि कुत्राथवा कस्मिन् प्रसङ्गे?

कथं सृष्टेः प्रादुर्भावः – विषयस्यास्य सुस्पष्टं वर्णनं धर्मशास्त्रे पुराणे च परिदृश्यते। श्रीमद्भागवतमहापुराणानुसारं यदा प्रकृतिः त्रिभिः गुणैः साम्यावस्थायां भवति तदा तस्यामुत्पद्यमानक्षोभात् महत्तत्वमाविर्भवति, महत्तत्वादहङ्कारः, अहङ्कारादेकादश करणानि, पञ्च तन्मात्राश्च, पञ्चतन्मात्रेभ्यः पञ्च महाभूतानि जायन्ते।[1] ततः क्रमशः संसारस्य विकासः, सांख्यदर्शनप्रधानं सृष्टितत्त्वमेतत्।

पुनः तत्त्वदर्शिनां मतेन न किञ्चित् प्रादुर्भवति, अपितु रूपान्तरमात्रं प्राप्नोति। अतः गीतायामुच्यते–

**नासतो विद्यते भावो नाभावो विद्यते सतः।** (गीता 2/16)

अर्थात्, असद्वस्तुनः सत्ता नास्ति तथा सद्वस्तुनः अभावोऽपि नास्ति। तथापि कथं विश्वं, सूर्यस्तथा पृथिवीत्यादीनि जागतिकतत्त्वानि प्रादुर्बभूवुः इति विषयः उत्कण्ठां समुद्रेकां करोति मनसि। वैदिकाधुनिकमतयोः सृष्टितत्त्वविषये समन्वयः प्रबन्धेऽस्मिन् उपस्थापनीयोऽस्ति।

## आधुनिकविज्ञानमतेन सृष्टितत्त्वम्

विश्वविज्ञानं धर्मदर्शनेभ्यः पृथगभूदस्मिन्नाधुनिकविज्ञानस्य युगे यदा आइन्ष्टाइन महोदयः माध्याकर्षणशक्तेः कृते स्वकीयं तथ्यमाविष्कृतवान् (the theory of gravitation : the general theory of relativity)। विश्वास्यास्य स्थिराव-स्थायाः परिकल्पनमसम्भवमेव। 1929 ख्रीष्टाब्दे नामकेन वैज्ञानिकेनास्य परिवर्त्तनशीलविश्वस्य चित्रं सुस्पष्टं कृतम्। विश्वं तदभ्यन्तरवस्तुभिः सह प्रसरणशीलमिति (expanding) तदाविष्कृतनियमस्य सरलार्थः।

प्रसरणकारणात् विश्वस्य परिवर्त्तनं निश्चितम्। अतोऽतीतं विश्वं साम्प्रतिकविश्वतोऽपि भिन्नम्। पदार्थविज्ञानस्य तथ्यमाधारीकृत्यातीतविश्वं समधिकघनत्व-विशिष्टं (denser) तथोतप्तमासीदिति (hotter) वक्तुं शक्यते। आमेरिकीय-वैज्ञानिकेन George Gamow महोदयेन तथ्यमिदमाविष्कृतं तथा तथ्यमिदमाधृत्य तेन विश्वस्य प्रादुर्भूते महाविस्फोटस्य (the role of Big Bang) भूमिका स्वीकृतास्ति। 1929 ख्रीष्टाब्दे यदा Edwin Hubble महोदयेन प्रसरणशीलविश्वस्य स्वरूपं सुस्पष्टं प्रतिपादितं तदा तेनैतदप्याविष्कृतं यत् छायापथाः परस्परात् पृथक् भूताः जायन्ते तथा दूरस्थानां छायापथानां पश्चात्पदतायाः (recession) वेगोऽपि अधिकः। अस्य छायापथप्रसारस्य वेगः प्रतिनियुतालोकवर्षस्य कृते 50किमी/सेकेण्ड। वेग एष आधुनिक-विज्ञाने Hubble ध्रुवाङ्क इत्युच्यते।


Hubble ध्रुवाङ्कः=50 किमी/सेकेण्ड/$10^6$MPC(Mega Parallax Second)


इदानीं विश्वस्य विषये एतदेव सर्वशेषं विवरणम्। यदि तथ्यमेतत् स्वीकृतं स्यात् तर्हि विज्ञानिनः महोदयेनाविष्कृतस्योत्तप्तमहाविस्फोटस्य (hot bigbang) विपरिणाम एव साम्प्रतिकं विश्वप्रारूपम्। प्रसरणशीलवस्तुनः एकः प्रारम्भबिन्दुः भवति। अस्य विश्वस्य प्रारम्भः महाविस्फोटात् यदविछिन्नगत्या प्रसरणशीलम्। स्थानकालौ अस्मादेव जागतिकप्रसङ्गात् प्रादुर्बभूवतुः। सृष्टिक्षणे समयस्य मूल्यं शून्यमासीत् (T = 0)। अतः सृष्टेः प्राक् व्यावहारिककालः अनिर्वचनीयः।




महाविस्फोटादनन्तरं सहसा बहुक्षुद्रं, बहूत्तप्तं तथादिशक्त्या (primordial force) सुबहुधनत्वविशिष्टं विश्वमेकप्रकारेण अणुरूपेण परिवर्त्तितं जातमिति तथ्यं Steven Weinberg महोदयः The First Three Minutes इति स्वकीये पुस्तके लिखति। एतं वयमेकमग्निपिण्डमिति वक्तुं शक्ष्यामः। Love महोदयस्य मतानुसारमादौ एकमग्निपिण्डमासीत् यस्मात् नक्षत्राणि (stars) तथा छायापथाः (galaxies) समुत्पन्नाः।[2] तद्दिनादेव विश्वमिदं क्रमशः प्रसारपथे गच्छति तथा वयं साम्प्रतिकं विश्वं प्राप्नुमः। प्रसरणशीलं विश्वं परिलक्ष्यैतत् वक्तुं शक्यते यदेकदा समय आसीत् यदा विश्वं क्षुद्रातिक्षुद्रं बिन्दुमात्रमासीत् यस्य परिज्ञानाय 15 निखर्बवर्षाणि ($15 \times 10^9$) पश्चाद्गमनं काम्यम्।

**विश्वोत्पत्तिविषये प्रारूपितं प्रतिरूपत्रयम्** – प्रसङ्गेऽस्मिन् साम्प्रतिकः ब्रिटेनशदेशीयः प्रसिद्धवैज्ञानिकः Prof.Stephen Hawking महोदयः चर्चां करोति। यदि एकस्मिन् क्षुद्रायतने प्रभूतमात्रया शक्तिः प्रपूरिता स्यात् तर्हि विस्फोटः भविष्यति। विश्वोत्पत्तिपसङ्गे स एव विस्फोटः महाविस्फोटः। रुषदेशीयेन वैज्ञानिकेन Friedmann महोदयेन महाविस्फोटात् विश्वोत्पत्तिसम्बन्धितं प्रारूपितं प्रतिरूपत्रयं प्रदर्शितमस्ति।



अत्र प्रथमं रेखा चित्रं (Figure-1) प्रदर्शयति यत् प्रतिवेशिछायापथद्वयस्य दूरत्वं क्रमशः परिवर्धते समयानुसारम्। प्रसारणमेतत् शून्यतः प्रारभते एकां निर्दिष्टां सीमां यावत् तथा तस्य संकोचनं भूत्वा शून्यमवशिष्यते। अत्र संप्रसारणस्य वेगः धीरः पारस्परिकाकर्षणबलप्रभावात्।

द्वितीये रेखाचित्रे विश्वप्रसारणमेवं तीव्रगत्या भवति यत् माध्याकर्षणबलमेतद् अवरोद्धुं न शक्नोति। अत्र प्रसारणं शून्यतः प्रारभते तथा छायापथाः परस्परात् महता वेगन पृथग्भवन्ति। अत्र विश्वप्रसारः अश्वस्योपरि सज्जितस्यासनवत् कल्पितोऽस्ति।

तृतीयं समाधानमेवं यत् विश्वमेतत् तीव्रेण प्रसरति केवलं प्रतिध्वंसमथवा पुनःपतनम् (recollapse) अवरोद्धुम्। एतदपि शून्यतः प्रारभते तथानन्तकालं यावत् सम्प्रसारितं भवति। छायापथानां परस्परात् पृथग्भूतस्य वेगः यद्यपि क्रमशः ह्रियते तथापि न कदापि शून्यतामाप्नोति। अत्र विश्वं समतलविशिष्टमिति मत्वास्य प्रसारोऽनन्त इति आकलितोऽस्ति।[3]

प्रथमं प्रतिरूपं विश्वप्रसारणमनन्तसीमापर्यन्तं न नयति यद्यपि नास्ति विश्वस्य कापि परिसीमा। आकर्षणबलमेवं तीव्रं यत् महाशून्यं स्वाभ्यन्तरेऽवनमितं भवति यथा पृथिव्याः तलम्। चित्रमेतत् शास्त्रदृष्ट्या समन्वयकारि मन्यते। यथा सर्गोत्पत्तिः, सर्गस्य क्रमिकविकासः तथा निर्दिष्टसमयावधौ प्रतिसर्गमुपस्थितिः तथैवाधुनिक-विज्ञानानुसारं महाविस्फोटात् सृष्टेः प्रादुर्भावः तथा क्रमिकप्रसारणम्। महाविस्फोटात् प्रागवस्था यथाधुनिकविज्ञानस्य कृते वर्णनातीता तथैव ऋग्वैदिक-नासदीयसूक्तानुसारं साऽनिर्वचनीया। नासदीयसूक्तस्य (X.129) विवेचनात् कतिपयानि सृष्टिविषयकतत्त्वानि सुस्पष्टानि जायन्ते।

## वेदे सृष्टितत्त्वस्य स्वरूपम्

सूक्ष्मपर्यवेक्षणेनाधुनिकसृष्टितत्त्वेन सह नासदीयं सूक्तं तुलयितुं शक्यते। वैदिकऋषिणानेन नासदीयसूक्तेन विश्वोत्पत्तिसम्बन्धितानि तथ्यानि सन्धारितानि सन्ति।

**(क) सत्तामात्रस्य निराकरणम्**–सृष्टेः प्रागवस्थायां न 'असदा'सीत् न 'सद'पि। 'सत्' अर्थात्, सत्ताथवा यस्य तत्त्वस्यावस्थानं सदैव भवति तस्यास्तित्वं नासीत्। पुनः असत् अर्थात्, यस्य कदापि अस्तित्वं नास्ति तदपि नासीत्। अर्थात्, सदसदोः उद्भवोऽस्य विश्वसृष्टेरनन्तरमेव। यस्य प्रत्यक्षानुभवक्षमताऽस्ति तदेव 'सत्'। अतः पृथिवी, आपः, वायुः, सूर्यः, गौः, अश्वः-इत्येते सत्त्वविशेषाः 'सत्'। सतः परमेव 'असत्' शब्दस्य प्रादुर्भावः। यस्य सत्तामात्रमपि नास्ति तदेवासत्।



यथा-कथयन्ती गौः, डीयमानः अश्वः, चलन् पर्वत इत्यादयः। सर्वाण्यसद्वस्तून्यस्तित्वरहितानि।

एवं रूपेण सदसदोः स्वरूपं सुस्पष्टं जातम्। यथा सृष्टेः प्रागवस्थायां सदसदोः अस्तित्वमेव नासीत् अर्थात् सैवावस्था अनिर्वचनीयासीत् तथैवाधुनिकं विज्ञानमपि महाविस्फोटात् अर्थात् सृष्टेः प्रागवस्थायाः विषये नीरवतामवलम्बते। यतः व्यावहारिकसमयस्य प्रादुर्भावः सृष्टितः एव। महाविस्फोटादनन्तरमेव कतिपयक्षणाः घटनाबहुलाः आसन्। एकेन पक्ष्मपातेन बहूनि वस्तूनि संसृष्टानि बभूवुः। विशिष्टेन वैज्ञानिकेन Steven Weingberb महोदयेन सृष्टेः प्रागवस्थाविषये The First Three Minutes नाम्नैकं पुस्तकं लिखितमस्ति।

पुनः "नासीद् रजो. . . ." इत्यत्र लोकस्य निराकरणं स्वाभाविकम्। लोकः अर्थात्, निवासस्थानम्। यत्र सत्तामात्रमपि नास्ति तस्य निवासस्थानस्य प्रश्न एव नोदेति। यतः सत्तायाः कृते लोकस्यापरिहार्यता वर्त्तते। जीवसत्तायाः कृते एकस्य ग्रहस्य तथा सूर्यस्याप्यपरिहार्यता वर्त्तते। अतः 'रजस्' शब्दस्यार्थः एकं सौरजगत् यत्र पृथिवीसदृशः ग्रह एकः स्यात्। ऋषिः स्पष्टीकरोति यत् सृष्टेः प्रागवस्थायामेतादृशः कश्चिद् लोकः नासीत्। 'रजस्' शब्दस्यापरः अर्थः अणुरपि भवति। आधुनिक-विज्ञानानुसारं तदानीं परमाणुसंरचनापि (Formations of atoms) नैव शक्यासीत्। अतः सृष्टेः प्रादुर्भावकाले किं पुनः आवरणतत्त्वमासीत्? कुत्र कस्य सुरक्षायाम्? प्रश्नद्वयात् ऋषिः कस्याप्यावरणतत्त्वस्यानुमानं करोति। अर्थात्, कस्यापि वस्तुनः संसृष्टिः स्यात्। परन्तु किं तथा केन निर्मितमिति प्रश्नद्वयमनुत्तरितमासीत्। ऋषिभिः प्रश्न एषः आह्वानरूपेण संस्थापितोऽस्ति अपरविदुषां कृते।

**(ख) अम्भस् –** ऋषिः प्रश्नं करोति - कः अतलस्पर्शिनं विशालं शब्दं करोति।

अस्य प्रश्नस्योत्तरे 'अम्भस्' शब्दस्य प्रयोगः भवति। साधारणतया यस्यार्थः भवति 'जलम्।' परन्तु आदौ एवोल्लिखितमस्ति यत् सृष्टेः प्रागवस्थायां न किञ्चिदपि वस्तु आसीत्। तर्हि कथं पुनः जलम्? अतः 'अम्भस्' शब्दस्यार्थोऽत्र जलं न भवेत्। 'अम्भस्' शब्दकरणमित्यर्थः प्रवहमानजलस्य शब्दजननकारणात्। यतः प्रसङ्गेऽस्मिन् जलस्य स्थितिरेव नासीत्, परन्त्वन्यं किञ्चिदासीत् यत् शब्दजनकमासीत्।। ऋषिणा तदेव वस्तु 'अम्भ' इत्युक्तमस्ति। शब्द एकः तरङ्गरूपः। तरङ्गः अर्थात् शक्तेः परिप्रकाशः (propagation of energy)। विश्वोत्पत्तेः प्राक् सर्वमेव शक्तिस्वरूपमासीत्। अतः 'अम्भस्' शक्तेः एकं प्रतिरूपम्(a form of energy)।

**(ग) एकमात्रतत्त्वस्य ग्रहणम् –** आधुनिकैः वैज्ञानिकैः एकस्यैव विलक्षण-भूतथ्यस्य प्रसङ्गः स्वीकृतोऽस्ति। Gamow, Sir James Jeans तथा Sir John Lovell एते त्रयः स्वीकुर्वन्ति यत् महाविस्फोटादनन्तरं विश्वं संसृष्टम्। अतः बिन्दुत एव विश्वप्रसारणम्। तथ्यस्यास्य शास्त्रीयः पक्षः हिरण्यगर्भसूक्तेनैव (X.121) परिपुष्टः भवति। यतोऽत्र सुवर्णमयादण्डादेव सृष्टेः प्रादुर्भावः ऊहितः।

पुनः मृत्योः, अमृतत्वस्य तथा दिवारात्र्योरपि यद्यपि निरासः परिदृश्यते तथापि एकस्यैव तत्त्वस्य स्वीकारः अवगम्यते यत् विना वातं श्वासग्रहणमकरोत्। एतदेव तत्त्वमुपरि वर्णिततत्त्वात् किञ्चित् भिन्नम्। अत्रास्यैव तथ्यस्य यद्यप्येकः पारमार्थिकार्थः वर्त्तते तथाप्याधुनिकविज्ञानक्षेत्रे Dr. Gamow स्पन्दनशीलतारकाणां विषये यद् वदति तत् प्रणिधानयोग्यम्। सः स्वकीये पुस्तके Birth and Death of Sun इत्यत्र लिखति यत् "डाप्लरपरिणामस्य (Doppler Effect)[4] निरीक्षणादेतत् सिद्धं भवति यत् सेफिड्नक्षत्राणि (Cepheid Variables) वास्तवेन श्वसनं कुर्वन्ति। अर्थात्, तेषां पृष्ठभागः स्पन्दितः भवति।" यथार्थेन तेषां नक्षत्राणामुज्ज्वलतातिशीघ्रं परिवर्त्तिता भवति (The luminocity of the stars changes very soon)। ऋषिः वर्णयति–तदेव तत्त्वं स्वात्मशक्त्या श्वासग्रहणमकरोत्। वर्णनायां तुल्यसादृश्यदृष्ट्या Gamow महोदयस्य कथनमत्रोल्लेखनीयम्–"आणविकशक्तेः तथा गुरुत्वाकर्षणशक्तेः मध्ये प्रचलितमन्तर्गतं संघर्षणमेवास्य स्पन्दनस्य कारणम्।"[5]

तदानीमेकमात्रतत्त्वं तदेवासीत्। आधुनिकविज्ञानस्य मतानुसारं तदानीं वायोः अखण्डमावरणमेकमासीत् तथा तन्मध्ये तारकाणां तथाकाशगङ्गायाः प्रादुर्भावोऽभूदिति महोदयस्य मतम्। Lovell कथयति यत् विश्वोत्पत्तेः काले एकमेवाग्निपिण्डमासीत्। ऋषिणा सह वैज्ञानिकमतद्वयं समन्वयं स्थापयति।

यथार्थेनात्रोपमादृष्ट्या तुलना समुचिता मन्यते।

**(घ) आभुतत्त्वम् –** वायवीयबिन्दवः जागतिकवायुतः संसृज्यन्ते प्रायेण द्वि/त्रि-आलोकवर्षात्मकेन विस्तारेण (अथवा व्यासेन) तथा $10^{30}$ कि.ग्रा.–परिमाणात्मकेन वस्तुत्वेन। ऋषिभिः वस्त्वैतत् 'आभु' नाम्नाभिहितमस्ति। नाम स्वयमेव वस्तुनः संज्ञापनं करोति। "आसमन्तात् भवतीति आभु।"[6] Gamow महोदयस्य मतेन विश्वस्य प्रारम्भे वायोरेकमखण्डमावरणमासीत्। ततः तन्मध्ये भारसाम्यासामञ्जसस्य कारणात् तदखण्डं खण्डितमभूत् तथा तन्मध्ये भिन्नाः गुच्छाः (cluster) संसृष्टाः।



तेभ्यः गुच्छेभ्य एव साम्प्रतिकनक्षत्राणि संसृष्टानि। एते गुच्छाः आधुनिकविज्ञानिभिः Gas Drop इति नामितमस्ति।

पुनः ऋषिभिः यदुक्तमस्ति "तुच्छ्येनाभ्वपिहितं यदासीत्" इत्यस्यार्थं कुर्वन् सायणाचार्यः वदति यत् 'आ समन्तात् यद् भवति' तदेव तत्त्वं तुच्छकल्पनेन सदसद्विलक्षणेन भावरूपाज्ञानेन छादितमासीत्।[7] अर्थात्, आभ्यन्तरवस्तुनः गुरुत्वं तदाच्छादकवस्तुनः गुरुत्वात् निश्चयेनाधिकम्। आधुनिकाः वैज्ञानिका अप्यत्र सममताः दृश्यन्ते। नक्षत्राणां संघटनेऽस्यैवाभुतत्त्वस्य महत्त्वपूर्णा भूमिका वर्त्तते। माध्याकर्षणबलमेतेषां वायुबिन्दूनामुपरि कार्यं करोति। अतः घनपदार्थानां केन्द्रे संग्रहो भवति तथा परिधौ लघूनाम्। अतः बिन्दुरूपं तदेव तत्त्वं लघुपदार्थैः परिव्याप्तं भवति। स एव बिन्दुः नक्षत्रस्य नाभिकीयं केन्द्रं भवतीति आधुनिकविज्ञानस्य मतम्।

कदाचित् मनसि प्रश्नः भवति यत् केषां पुरातनत्वं सिद्धं–नक्षत्राणामथवा छायापथानाम्? Gamow निगदति यदसंख्यैः नक्षत्रैरेव छायापथाः संसृष्टाः। अत एतदनुमीयते यत् नक्षत्राण्येव पुरातनानि। परन्तु Sir James Jean महोदयस्य मतं भिन्नम्। विश्वस्मिन् यः प्राथमिकः वायुः प्रपूरित आसीत् सः वायवीयनिहारिकासु (Nebulae) रूपान्तरितः जातः तथा ता एव निहारिकाः छायापथान् संघटयन्ति। ते पुनः पृथक् भवन्ति तथा नक्षत्राणां संसृष्टिर्भवति। Lovell महोदयस्य मतेनादौ यदग्निगोलकमासीत् तस्मात् नक्षत्राणि तथा छायापथाः युगपदेवाजायन्त। आधुनिकविज्ञानिषु यद्यपि सहमतिः नास्ति तथापि Lovell महोदयस्य मतं सर्वाधिकं ग्राह्यं भवति। तथ्यमेतत्तु वर्षसहस्रात् प्रागेव प्रजापतिपरमेष्ठि-ऋषिणा 'आभु'–तत्त्वमाध्यमेन संकेतितमस्ति। ऋषिभिः दिव्यचक्षुषा दिव्यज्ञानमधिगतमासीत् यदतिशायि वर्त्तते विज्ञानात्।

**(ङ) ग्रहोत्पत्तौ स्वधा तथा प्रयतिः –**परिव्याप्तपदार्थेषु कतिपयाः एकीभूताः जाताः तथा बीजधारणकारिणः आसन्। ते पदार्थाः स्वस्य पारिपार्श्विकपदार्थान्नाकर्षितवन्तः तथा महान्तः संजाताः। तेषामाधारः प्रबर्धितः जातः तथा ते स्वकीयप्रयासेन अर्थात्, गुरुत्वाकर्षणबलेन (gravitational force) अन्यान्यव्यापकपदार्थान् स्वाभ्यन्तरे संगृह्णन्ति। एवं प्रयासरताः आकारेण महान्तः जाताः। यः रेतोधाः केवलमात्मानं पश्यति तथापरान् न समाकर्षति सः क्षुद्राकारविशिष्टः भवति। अर्थात्, यदाभुतत्त्वमथवा यः वायुबिन्दुः क्षुद्रः भवति तदाभ्यन्तरशक्तिरपि क्षीणा भवति। अतः सः अपरान् समाकर्ष्टुं न शक्नोति। ऋषिणा स एव पदार्थः स्वधानाम्ना नामितोऽस्ति (स्वान् धारयतीति स्वधा)। पुनः कतिपयाः बिन्दवः आकर्षिताः भूत्वा बृहद्वायुबिन्दुषु (प्रयातिषु) निलीनाः भवन्ति। अतस्तेऽपि 'स्वधा' नाम्ना नामिताः भवन्तति।

वैदिकऋषेः विचार एषः जर्मानविदुषा कॉंटमहोदयेन सह प्रायेण समतां नयति। अनन्तरं कॉंटमहोदयस्य सिद्धान्तः फ्रेंचगणितज्ञेन डी.लाप्लासेमहोदयेन संशोधितोऽस्ति। परवर्त्तिनि समये जर्मनपदार्थविज्ञानिभिः तस्यैव तथ्यस्याधारेण बहूनि कार्याणि कृतानि। विज्ञानिभिः[8] प्रतिपादितं भवति यदादौ सूर्यस्योपरि एकप्रतिशतभागे धूलयः आसन्। धूलिकणिकाः यदा संश्लिष्टाः भवन्ति तदा घनीभूताः संजाताः तथावशिष्टनवनवतिभागः वायुमयः आसीत् यः तीव्रकेन्द्रीयोत्प्रेरणकारणात् दूरस्थः जातः। याः घनीभूताः धूलिकणिकाः आसन् ताः इतस्ततः व्याप्ताः क्षुद्रकणिकाः आकृष्य बृहदाकारविशिष्टाः जाताः। एवंरूपेण ग्रहाः (Planates) संसृष्टाः वैज्ञानिकैः एतदपि निरीक्षितमस्ति यत् क्षुद्रगोलकस्य बृहद्गोलकेन सह संघटनात् क्षुद्रस्य विलयो भवति बृहति। मन्त्रे एतानि क्षुद्रगोलकानि 'स्वधा' इति तथा बृहद्गोलकानि 'प्रयतिः' इति नामितानि सन्ति। एवं किञ्चित् सामञ्जस्यं परिदृश्यते वैदिकाधुनिकयोः तथ्ययोः मध्ये।

**(च) जगदाधारः –** कोऽपि यथार्थेन न जानाति विश्वमिदं कथं प्रादुर्बभूव। नासदीयसूक्तस्य षष्ठमन्त्रः प्रश्नं करोति–कः सृष्टिविषयकप्रश्नानां समुचितमुत्तरं प्रदास्यति। अत्र देवा अपि न समर्थाः। यतः सृष्टिः प्राचीना तथा देवा अर्वाचीनाः।

सप्तमे मन्त्रे प्रश्नव्याजेन उत्तरस्यास्य संकेतः प्राप्यते। ऋषिः कथयति यस्मादस्य विश्वोत्पत्तिः स एवैतत् धारयति। तथ्यस्यास्य परमार्थः यद्यपि महान् तथापि भौतिकविज्ञानदृष्ट्या सूर्यः पृथिवीं तथापरान् ग्रहान् धारयति। यतः ग्रहा एव सूर्यस्य गुरुत्वाकर्षणक्षेत्रमध्ये विद्यन्ते। सूर्यः स्वस्य ग्रहमालया सह आकाशगङ्गायां (milky way) स्थितः। आकाशगङ्गातः संसृष्टाः सूर्यमालाः आकाशगङ्गां धारयन्ति। आकाशगङ्गायाः केन्द्रं परित एव सूर्यमाला अवस्थिताः। ऋषिभिरपि आकाशगङ्गायाः केन्द्रस्थं नक्षत्रं 'मूलबर्हि' (saule) इति नामितमस्ति। अतः 'मूला' नक्षत्रमेव अस्मदीयच्छायापथस्य (milky way) केन्द्रस्थलम् (galactic centre of the milky way)। एतत् मूलानक्षत्रं धनुर्नक्षत्रमण्डले (in sagittarious constellation) वर्त्तते। अस्मादेव मूलानक्षत्रतात् शाखोपशाखाः परिव्याप्ताः सन्ति येनैतत् व्यजनाकारं नयति। एतत् सर्वं परिज्ञाय एवास्य नाम 'मूलबर्हि' इति प्रदत्तमस्ति। अथर्ववेदेऽस्य नाम मूलमिति लिखितमस्ति।[9]

पुनः प्रश्नः भवति कः अस्माकं छायापथस्य सहायकः? आधुनिकविज्ञानमेतदुत्तरयितुं न शक्नोति। वैदिकऋषिणा उत्तरितं यत् परमे आकाशे संस्थितः परमाध्यक्षः सर्वाः आकाशगङ्गाः धारयति। यः एतासामाकाशगङ्गानां तथा विश्वसकलस्य स्रष्टा सः निश्चयेन जानाति सृष्टिरेषा कदा तथा कुतः आविर्भूता। एतदुक्त्वा ऋषिः पुनः



प्रश्नमुपस्थापयति–यदि सः न जानाति पुनः कः जानाति? अर्थात्, यं परमश्रेष्ठं वयं सृष्टिनिर्मातेति स्वीकुर्मः स एव सर्वातिशायी अथवा तस्मादपि काचित् महती शक्तिः वर्त्तते? समस्यैषा समाहिता ऋषिभिस्तथा विज्ञानिभिरपि।

विज्ञानिभिस्तु परमे व्योम्नि स्थितस्य परमाध्यक्षस्य सत्तापि अस्वीकृतास्ति, यतः सः तेषां पर्यवेक्षणक्षमतायाः बहिर्भूतः। परन्तु कथमृषिभिः तत् सम्भावितमस्ति? अत्र कारणमेतत् प्रतिपाद्यते–आधुनिकवैज्ञानिकाः चिन्तनजगति चतुर्थविमापर्यन्तं (upto fourth dimension) गन्तुं पारयन्ति। परन्तु वैदिकऋषयः बोधिमानसस्य उत्कर्षद्वारेण सप्तमविमां (seventh dimension) समारूढवन्तः। एतदाधुनिकवैज्ञानिकानां कृते विस्मयप्रदम्।[10]

## वैदिकाधुनिकमतयोः मध्ये भेदस्थलम्

'आभु' तत्त्वस्य चर्चाप्रसङ्गे येषां वायवीयबिन्दूनां चर्चा कृतास्ति यथार्थेन तदेव तथ्यम् 'इथर' इति तत्त्वेन सह तुलयितुं शक्यते। पर्य्यालोचनात् ज्ञायते यदाधुनिकं विज्ञानं यदा परमात्मतत्त्वं न स्वीकरोति अपितु केवलं प्राकृतिकनियमान् (Natural Laws) स्वीकारोति तदा शास्त्रीयं मतं शाश्वतनियमान् यथा सम्मानयति तन्नियमकर्त्तारमपि तथैव सर्वोच्चस्थानं ददाति। एषैव भिन्नता उभयोर्मध्ये।

## उपसंहारः

वैदिकज्ञानस्य मन्थनं तथा पौनःपुनिकपर्यालोचनं नूतनानामविष्काराणां कृतेऽपरिहार्यं मन्येते। इतिहासज्ञानस्यावश्यकता याधुनिके युगे सैव प्रयोजनीयता वर्त्तते सृष्टितत्त्वस्य कृते। एतदपि ध्यातव्यं यदस्माभिः आविष्कृतानि वैदिकतथ्यानि न भवेयुः सदैवाधुनिक विज्ञानवत्। अत आविष्कृततथ्यानां त्रिविधं रूपं सम्भवेत्–(i) साम्यं (ii) वैषम्यं तथा (iii) सम्पूर्णं नूतनम्। नासदीयसूक्तमन्त्रेषु द्विविधपदार्थानां चर्चा उपलभ्यते। यथा–

| **सृष्ट्युत्पत्तिसमये सत्तायुक्ताः** | **सृष्ट्युत्पत्तिसमये सत्ताहीनाः** |
|---|---|
| आनीदवातम् एकम् (One unimovable) X.129.2 | सत् (existent) X.129.1 |
| उपरि (above) X.129.5 | असत् (non-existent) X.129.1 |
| स्वधा (Energy)X.129.5 | रजः (Planates) X.129.1 |
| प्रयतिः (Impulse)X.129.5 | व्योम (Firmament) X.129.1 |
| अप्रकेतं सलिलम् (Fluid)X.129.3 | मृत्युः (Death) X.129.2 |

| | |
|---|---|
| आभ्व (All pervading void) X.129.3 | अमृतम् (immortality) X.129.2 |
| रेतोधाः (impregantors)X.129.5 | रात्र्या अह्नः प्रकेतः (the mark of night and day) X.129.2 |
| महिमानः (the great forces)X.129.5 | |

प्रत्येकं विषयस्य मूलज्ञानमावश्यकम्। सृष्टेः विकासप्रकल्पनायां (आधुनिकेऽर्थे) मौलिकतत्त्वस्य सम्यक् अवबोधनं निश्चयेन समधिकं लाभप्रदं कल्याणकरं च। आधुनिकमानवस्य कृते यन्त्रांशस्योपरि या निर्भरशीलता वर्त्तते सा नैकदिवसस्य गवेषणायाः फलम्, अपितु युगान्तरव्यापिन्याः गवेषणायाः फलम्। अनन्तज्ञाननिधौ पुनरपि नूतनानि स्युः इति जिज्ञासया आधुनिकविज्ञानिनः अपि वैदिकज्ञानलाभाय समुत्सुकाः प्रतीयन्ते। अतः वैदिकज्ञानस्य यथार्थचर्चाबलेनैव विनूतनानि समाजस्य कृते उपायनभूतानि भविष्यन्तीति आशासे।

## सन्दर्भाः

1. अव्याकृतगुणक्षोभान्महतस्त्रिवृतोऽहमः।
भूतमात्रेन्द्रियार्थानां सम्भवः सर्ग उच्यते।। (श्रीमद्भागवते 12/7/11)

2. वर्तक, पद्मकरण विष्णु-वेद, विज्ञान और विश्वोत्पत्ति, वैदिकी (वैदिक परिचय तथा रचनाएँ)-अखिल भारतीय वेद महोत्सव, इन्दौर (म.प्र.),10,11,12 नवम्बर,1992पृ.6

3. Hawking, Stephen W., A Brief History of Time, pp.45-48

4. If there is relative motion between the source and absorver then the frequency of light/sound apperars to change from it's original value. It is known as 'Doppler Effect' according to the name of the scientist C.J. Doppler.

5. वर्तक, पद्मकरण विष्णु-वेद, विज्ञान और विश्वोत्पत्ति, वैदिकी (वैदिक परिचय तथा रचनाएँ)-अखिल भारतीय वेद महोत्सव, इन्दौर (म.प्र.)10,11,12 नवम्बर, 1992,पृ.3

6. Chaubey, Braj Bihari, The New Vedic Selection, Part II, p.482

7. Chaubey Braj Bihari, The New Vedic Selection, Part II, p.482

8. German Physicist Carl von Weissacker, Kuiper and Terhar

9. अथर्ववेदः XIX /7/3

10. दे, सीतानाथ-संस्कृतं विज्ञानं , लोकसंस्कृतम्,1996 नभेम्बर तथा 1997 फरवरी, पृ.30।



# अद्वैतवेदान्तदर्शनप्रतिपादितं मनः - एका समीक्षा

**मीनाक्षीरायः, करुणानन्दमुखोपाध्यायः**

**सारांशः**

ब्रह्माण्डेऽस्मिन् प्राणनशक्तिमतो जीवस्य आविर्भावे, विकासे, परमपुरुषार्थभूतमोक्ष-प्राप्तौ च सर्वत्र मन एव हेतुभूतं विद्यते। अतएव आधुनिकवैज्ञानिकानां दार्शनिकानाञ्च अनुसन्धानस्य प्रमुखविषयोऽस्ति मनः। निबन्धेऽस्मिन् अद्वैतवेदान्तदर्शनप्रतिपादितां दृष्टिम् अवलम्ब्य मनस उत्पत्तिः, प्रकृतिः, कार्यशैली च अस्माभिः समीक्षिता। सत्यस्य उन्मोचनाय अन्यदर्शनप्रतिपादिता दृष्टिरपि सम्यक् आलोचिता वर्तते। समीक्षणवेलायाम् अस्माभिः दृष्टं यत् जन्यवस्तुत्वेऽपि मनसः क्षणभङ्गुरत्वं नास्ति, किन्तु आप्रलयं मोक्षसमयपर्यन्तं वा मनसः स्थायित्वमस्ति। मनस उत्पत्तिविचारमये उपादानकारणं निमित्तकारणं रासायनिकप्रक्रिया च पर्यालोचितानि। अन्ते च मनसः प्रकृतिविषये कार्यशैलीविषये च निरन्तरानुसन्धानस्य प्रयोजनीयता प्रदर्शिता।

## भूमिका

विश्वचेतना सर्वत्र व्याप्ता विद्यते, परन्तु यत्र मनः क्रियाशीलं वर्तते तत्रैव विश्वचेतनायाः अभिव्यक्तिः जीवरूपेण भवति। यत्र क्रियाशीलं मनो न विद्यते तत्र तस्याः अभिव्यक्तिर्न भवति इत्यतः विश्वचेतनाया जीवरूपेण अभिव्यक्तौ मनसो महती भूमिका अस्ति इत्यत्र नास्ति काचन विप्रतिपत्तिः।

किञ्च चेतनजीवानां विकासे तिरोभावे च मनस एव महत्त्वपूर्णा भूमिका अस्ति। देवीभागवतस्य इयं प्रसिद्धा उक्तिर्विद्यते-**मन एव मनुष्याणां कारणं बन्धमोक्षयोः**। (देवीभागवतम् 1/18/39)

तथाहि - विषयासक्तं मनः यस्य जीवस्य उपाधिः स रूपरसादिविषयाणाम् उपभोगं कुर्वन् कालान् अतिवाहयति। विषयासक्तमनसा प्रेरितः सन् सः जीवः पुनः पुनः विषयान् उपभुङ्क्ते तेन तस्मिन् रागः संजायते, ततः सः पुनः पुनः उपभोगार्थं

विषयप्राप्तये नानाविधं शुभाशुभं कर्म आचरति। तैः शुभाऽशुभकर्मभिः जीवात्मनि अदृष्टम् (कर्मजनितसूक्ष्मसंस्काराख्यम्) उपजायते। अदृष्टानाम् उपभोगाय पुनः सः अस्मिन् संसारे जन्म लभते। लब्धे जन्मनि च विषयासक्तमनसा प्रेरितः सन् स जीवः पुनः विषयान् उपभुञ्जन् विविधकर्माणि आचरति। एतादृशरीत्या यावत्पर्यन्तं जीवस्य उपाधिभूतं मनः विषयासक्तं वर्तते तावत्पर्यन्तं प्राणिनः कर्तृत्वभोक्तृत्वात्मक-बन्धनरज्ज्वा निबद्धाः सन्तः संसारेऽस्मिन् इतस्ततः परिभ्रमन्ति।

पक्षान्तरे मनो यदा विषयेभ्यः विरक्तं भवति तदा तदेव जीवानां मोक्षाय उपायभूतं भवति। तथाहि निष्कामकर्मानुष्ठानेन विषयासक्तिसहितं सत् मनः ब्रह्मविद्गुरू-पदिष्टमार्गेण श्रवणमननिदिध्यासनाऽनुष्ठानेन संस्कृतं भवति। तदनन्तरं गुरुणा 'तत्त्वमसि' इति महावाक्ये उपदिष्टे सति मनसः अखण्डब्रह्माकाराकारेण परिणामात्मिका वृत्तिरुपजायते, तस्यां च वृत्तौ चित्स्वरूपं ब्रह्म प्रतिबिम्बितं भवति। तत्प्रतिबिम्बसमन्विता ब्रह्माकाराकारिता चित्तवृत्तिरेव ब्रह्मज्ञानशब्देन उच्यते। तेन च मूलविद्यायाः तत्परिणामभूतकर्तृत्वभोक्तृत्वाऽऽत्मकप्रपञ्चस्य च बाधो भवति, अयमेव मोक्ष इति। वार्तिककारपादैः सुरेश्वराचार्यैरुक्तम्–

**अविद्यास्तमयो मोक्षः सा च बन्ध उदाहृतः।**

तात्पर्यमिदमस्ति यत् मोक्षेऽपि मन एव कारणं विद्यते। श्रुतिरपि मनसो मोक्षकारणतां प्रतिपादयति–

**मनसैवेदमाप्तव्यं नेह नानास्ति किञ्चन।** (कठोपनिषद् 2/1/11)

मोक्षदशायां जीवः जीवभावं परित्यज्य ब्रह्मैव भवति। कथयति च श्रुतिः-

**यो ह वै ब्रह्म नेद स ब्रह्मैव भवति।** (मुण्डकोपनिषत् 3/2/9)

एतदालोचनया स्पष्टं प्रतिभाति यत् अस्मिन् ब्रह्माण्डे चेतनजीवस्य आविर्भावे, विकासे, तिरोभावे च मन एव कारणतां भजते। अतएव अस्मिन् जगति मनसोऽतीव महत्त्वपूर्णं स्थानं विद्यते। ततः स्वाभाविकरूपेणैव मानवमनसि प्रश्नाः जायन्ते- किमस्ति मनसः स्वरूपम्? कस्मात् कारणात् अस्योत्पत्तिर्भवति? किदृशी अस्ति मनसः कार्यशैली? निबन्धेऽस्मिन् एतत्प्रश्नानां समाधानाय अद्वैतवेदान्तदर्शनदृष्टिम् अवलम्ब्य अस्माभिः प्रयासो विधीयते।

## मनसः स्वरूपम्

**(क) मनसोऽनित्यता**–मनसः स्वरूपविषये कश्चन मतभेदः दृश्यते



दार्शनिकसमाजे। यथा नैयायिकैः मनसो नित्यता एव अङ्गीक्रियते। तेषां मते मनः अणुपरिमाणविशिष्टं नित्यञ्च अस्ति। परन्तु अद्वैतवेदान्तदार्शनिकैः मनसोऽनित्यता एव अङ्गीक्रियते। तेषामयमाशयः अनित्यवस्तुनि षड्विकाराः अनुभूयमाना विद्यन्ते, ते च जायते, अस्ति, वर्द्धते, विपरिणमते, अपक्षीयते, नश्यति इति एतेषां विकाराणां मध्ये एकः द्वौ त्रयः ततोऽधिका वा विकाराः यत्र विद्यन्ते तद् वस्तु अनित्यम् एव, नित्यवस्तुनः पूर्णरूपेण विकाररहितत्वात्। मनसि परिणामात्मको विकारः प्रत्यक्षतया अनभूयते। तथाहि विपरिणामो नाम अवस्थान्तरप्राप्तिः। चक्षुरादीन्द्रियद्वारेण पुष्पादिविषयसमीपं प्राप्य मनः पुष्पाकारेण परिणमति। आचार्य धर्मराजाध्वरीन्द्रेण उक्तम्–**तथा तैजसमन्तःकरणमपि चक्षुरादिद्वारा निर्गत्य घटादिविषयदेशं गत्वा घटादिविषयाकारेण परिणमते।** (वेदान्तपरिभाषा, पृ.39)

इत्थञ्च अनुकूलविषयेण सह इन्द्रियसन्निकर्षे जाते मनसः सुखाकारेण परिणामः, प्रतिकूलविषयेण सह इन्द्रियसन्निकर्षे सति तस्य दुःखाकारेण च परिणामः सर्वेषामनुभवसिद्धः।

किञ्च आहाररूपेण गृहीतैः अन्नैः मनस उपचयोऽपि भवति। छान्द्रोग्यश्रुतिः कथयति–**अन्नमशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तत्पुरीषं भवति यो मध्यमस्तन्मांसं योऽणिष्ठस्तन्मनः** (छान्दोग्योपनिषत् 6/5/1)। एतन्मन्त्र-व्याख्यानावसरे आद्यशङ्कराचार्यैरुक्तम्–**योऽणिष्ठोऽणुतमो धातुः, स ऊर्ध्वं हृदयं प्राप्य सूक्ष्मासु हिताख्यासु नाडीष्वनुप्रविश्च वागादिकरणसंघातस्य स्थितिमुत्पादयन्मनो भवति। मनोरूपेण विपरिणमन्मनस उपचयं करोति। ततश्चान्नोपचितत्वान्मनसो भौतिकत्वमेव।** (छन्दोग्योपनिषद्भाष्यम् 6/5/1)

अतः वृद्धिविपरिणामादिविकारयुक्ततया मनः अनित्यमेवेति सिद्धम्।

**(ख) मनसः क्षणभङ्गुरत्वाऽभावः**–इदमत्र अवधातव्यम् यत् अनित्यत्वेऽपि मनसः क्षणभङ्गुरत्वं नास्ति, किन्तु यावत्कालपर्यन्तम् इयं सृष्टिर्विद्यते तावत्पर्यन्तं मनस्तिष्ठत्येव। प्रलयकाले एव मनः स्वकारणेषु तन्मात्रासु विलीयते। ब्रह्मसाक्षात्कारेण मूलविद्यायाः मायाख्यायाः नाशे तत्परिणामभूतस्य मनसः अपि बाधो भवति। तात्पर्यमिदमस्ति यत् अनित्यत्वेऽपि मनस आब्रह्मसाक्षात्कारं आप्रलयं वा स्थायित्वं विद्यते।

**(ग) मनसः उत्पत्तिमत्ता**–ब्रह्माण्डेऽस्मिन् यानि अनित्यभाववस्तूनि विद्यन्ते

तेषामुत्पत्तिर्दृश्यते। यथा घटः अनित्यः, तस्य कुम्भकारेण मृत्तिकाभ्य उत्पत्तिर्दृश्यते। एवं मनः अपि अनित्यं वस्तु, तस्मात् तस्यापि उत्पत्तिरभूत् सृष्टिप्राक्काले इत्यनुमितिर्भवति। तथा च अनुमानप्रयोगः–मनः उत्पत्तिमत् भावत्वे सति अनित्यत्वात् घटवत्। अस्मिन्ननुमाने मनः पक्षः, उत्पत्तिमत्त्वं साध्यम्, भावत्वे सति अनित्यत्वं हेतुः घटो दृष्टान्तः। यत्र यत्र भावत्वे सति अनित्यत्वं तत्र तत्र उत्पत्तिमत्त्वं यथा घट इत्यस्ति व्याप्तिः। यस्माद् मनसि भावत्वम् अनित्यत्वञ्च विद्यते तस्मात् तत्र उत्पत्तिमत्त्वमपि विद्यते इति पक्षधर्मताज्ञानसहकृतेन व्याप्तिज्ञानेन मनसि उत्पत्तिमत्त्वं सिद्ध्यति। प्रागभावे व्यभिचारवारणाय भावत्वे सति इति विशेषणम्।

श्रुतिरपि मनस उत्पत्तिमत्त्वं प्रमाणयति–**त्रीण्यात्मनेऽकुरुत इति मनो वाचं प्राणं तान्यात्मने अकुरुत।** (बृहदारण्यकोपनिषत् 1/5/3) आगमानुमानाभ्यां मनसः उत्पत्तिमत्त्वे सिद्धे इयं जिज्ञासा भवति यत् मनस उत्पत्तिः कुतोऽभवत्? कथम् अभवत्? अनयोः प्रश्नयोः प्रथमः कारणविषयकः अपरश्च कारण-व्यापारविषयकः।

## मनस उत्पत्तिप्रक्रिया

ब्रह्मैव ब्रह्माण्डं प्रति अभिन्ननिमित्तोपादानकारणम् इति वेदान्तसिद्धान्तानुसारेण मनस उत्पत्तौ अपि ब्रह्मैव कारणमस्ति, तथापि ब्रह्मणः साक्षादुत्पत्तिर्न भवति मनसः, किन्तु शब्दतन्मात्रादिभ्य एव साक्षादुत्पत्तिर्भवति। अर्थात् ब्रह्मणः शब्द-तन्मात्राद्युत्पत्तिद्वारेण मनस उत्पत्तिर्भवति। मनस उत्पत्तेः सम्यग्ज्ञानाय शब्दादिपञ्च-तन्मात्राणामुत्पत्तिः स्वरूपञ्च प्रथमं वर्ण्यते।

**(क) शब्दतन्मात्रादीनामुत्पत्तिप्रक्रिया**—सृष्टेः प्रारम्भिकसमये ब्रह्मणि विद्यमानायाः त्रिगुणात्मिकायाः मायायाः विक्षेपशक्तेः क्रमशः महत्तत्त्वाकारेण अहङ्कारतत्त्वाकारेण च परिणामो भवति । तयोः अस्तित्वप्रदानाय मायायां सामर्थ्यं नास्ति, अतएव अस्तित्वस्वरूपाद् ब्रह्मण एव ते महत्तत्त्वाहङ्कारतत्त्वे अस्तित्वं लभेते स्म। तदनन्तरं महत्तत्त्वाऽहङ्कारतत्त्वात्मकपरिणामद्वयसंयुक्तायाः मायायाः विक्षेपशक्तेः शब्दतन्मात्राद्याकारेण पञ्च परिणामाः क्रमशः जायन्ते। ताश्च शब्दतन्मात्रा, स्पर्शतन्मात्रा, रूपतन्मात्रा, रसतन्मात्रा एवं च गन्धतन्मात्रा इति नामभिः अभिधीयन्ते। पूर्वोक्तरीत्या ताः ब्रह्मण एवं अस्तित्वं प्राप्नुवन्ति स्म। एताः तन्मात्राः भूतसूक्ष्माः सूक्ष्मभूताः च कथ्यन्ते।



**(ख) तन्मात्राणां स्वरूपम्**–एताः शब्दादितन्मात्राः व्यक्तब्रह्माण्डस्य अङ्कुरावस्थाः सन्ति। तथाहि यथा पत्राणि, पुष्पाणि, शाखाप्रशाखाः, काण्डं मूलं फलञ्च सर्वम् अङ्कुरे अनभिव्यक्तदशायां तिष्ठन्ति, पश्चात्तेषाम् अभिव्यक्तिर्भवति तथैव शब्दादितन्मात्राः पञ्च रूपरसादिगुणविशिष्टस्थूलब्रह्माण्डात्मकग्राह्यशक्तेः बुद्धिचक्षुरादिज्ञानेन्द्रियपञ्चकवागादिकर्मेन्द्रियपञ्चकप्राणादिपञ्चकग्राहिकाशक्तीनाञ्च अङ्कुरावस्था इति। तात्पर्यमिदमस्ति यत् एताभ्यः एव तन्मात्राभ्यः पञ्चीकरणप्रक्रिया-माध्यमेन स्थूलनूतनोत्पत्तिद्वारा सम्पूर्णस्थूलब्रह्माण्डस्य आविर्भावो भवति। एवञ्च एताभ्यः एव तन्मात्राभ्य एकया विशिष्टप्रक्रियया सम्पूर्णब्रह्माण्डस्य (बाह्याभ्यन्तर-ब्रह्माण्डस्य) प्रकाशकरूपेण अन्तःकरणस्य, चक्षुरादिज्ञानेन्द्रियाणां वागादिकर्मेन्द्रियाणां प्राणादिपञ्चानाञ्च उत्पत्तिर्भवति। यस्मात्कारणात् कारणव्यापारात् प्रागपि कार्याणि स्वकारणे अनभिव्यक्तरूपेण तिष्ठन्ति इत्यस्ति प्रसिद्धनियमः,तस्मात् शब्दतन्मात्रादिपञ्च-ग्राह्यशक्तेः स्थूलब्रह्माण्डस्य अन्तःकरणादिग्राहिकाशक्तेश्च अव्यक्तावस्था इति कथ्यन्ते।

इत्थञ्च तन्मात्रासु गुणगुणिभावः अभिव्यक्तो नास्ति। यथा स्थूलभूते आकाशे शब्दो गुणः आश्रितः, आकाशो गुणवद्–द्रव्याश्रयः इति पृथगभिव्यक्तिरनुभूयते तथा शब्दतन्मात्रायां नास्ति। वस्तुतः शब्दतन्मात्रादिर्भूतानाम् एका ईदृशी स्थितिरस्ति यस्याः शब्दादिगुणस्य आकाशादिद्रव्यस्य च पृथगभिव्यक्तिः विद्यते।

**(ग) तन्मात्राभ्यः मनस आविर्भावप्रक्रिया**–त्रिगुणात्मिकायाः मायायाः परिणामतया तन्मात्राः अपि त्रिगुणात्मिकाः अर्थात् सत्त्वरजस्तमोगुणात्मिका एव सन्ति। ईश्वरेच्छया सृष्टेः प्रारम्भिकसमये शब्दादिप्रत्येकतन्मात्रायाम् एका मन्थनसदृशी क्रिया भवति, यथा प्रत्येकतन्मात्रायां रजस्तमसी अभिभूय सत्त्वगुणः उद्भूतो भूत्वा उपरिभागम् आगच्छति। शब्दतन्मात्रादिषु उद्भूततया विद्यमानानां सत्त्वांशानां मेलनेन मनस उत्पत्तिर्भवति। आचार्यसदानन्दयोगीन्द्रः मनस उत्पत्तिप्रक्रियां वर्णयन् कथयति-**बुद्धिर्नाम निश्चयात्मिकान्तःकरणवृत्तिः। मनो नाम संकल्पविकल्पात्मिकान्तः-करणवृत्तिः। अनयोरेव चित्ताहङ्कारयोरन्तर्भावः। एते पुनराकाशादिगत-सात्त्विकांशेभ्यो मिलितेभ्यः उत्पद्यन्ते।** (वेदान्तसारः, पृ.139)

**समीक्षा**–वर्णितायाम् एतदुत्पत्तिप्रक्रियायां भागद्वयं विद्यते, तत्र प्रथमो भागः–ईश्वरेच्छाया शब्दतन्मात्रादिषु विद्यमानसत्त्वगुणानां रजस्तमोगुणाभिभवद्वारा स्वात्मनो वृत्तिलाभः, अपरश्च भागः तेषाम् अभिव्यक्तसत्त्वगुणानां मेलनम्।

**(क) प्रथमः पर्यनुयोगः**–मनसः उत्पत्तिप्रक्रियायां विद्यमानप्रथमभागस्य उपरि एक प्रश्नः समुदीयात् यत् सत्त्वादिगुणानाम् एषः स्वभावो विद्यते यत् ते सर्वे अन्योन्यम् अभिभूय स्वात्मवृत्तिलाभाय निरन्तरं प्रयत्नशीलाः वर्तन्ते। उक्तं च – **अन्योन्याभिभवजननमिथुनवृत्तयश्च गुणाः।** (सांख्यकारिका - 12)

अन्योन्याभिभववृत्तयः इत्यस्य व्याख्यानावसरे आचार्यवाचस्पतिमिश्रैरुक्तम्– **सत्त्वं रजस्तमसी अभिभूय शान्तामात्मनो वृत्तिं प्रतिलभते** (सांख्यतत्त्वकौमुदी पृ.78)। एतत्स्वभावानुसारं तन्मात्रासु विद्यमानाः सत्त्वगुणा अपि रजस्तमसी अभिभूय आत्मनो वृत्तिलाभाय निरन्तरं प्रयत्नशीला वर्तन्ते, अतस्तेषां रजस्तमसी अभिभूय स्वात्मवृत्तिलाभाय स्वभाव एव पर्याप्तः, तदर्थमीश्वरेच्छायाः पृथक् कारणत्वस्वीकारः किमर्थम्?

**(ख) समाधानम्**–एतस्याः जिज्ञासायाः समाधानाय प्रयासो विधीयते, तथाहि- सत्त्वादिगुणानां साम्यावस्था प्रलयकाले तिष्ठति, तदानीमपि सदापरिणमनशीलानां सत्त्वादिगुणानां परिणामो भवति, परन्तु सः परिणामः सदृशपरिणामात्मकः, अर्थात् प्रलये एतस्य परिणामः सत्त्वरूपेणैव भवति, रजसो रजोरूपेणैव इत्यादि, तेन तदानीं गुणानां साम्यावस्थायाः भङ्गो न भवति। एतदभिहितं आचार्य-वाचस्पतिमिश्रपादैः- **प्रतिसर्गावस्थायां सत्त्वं रजस्तमश्च सदृशपरिणामानि भवन्ति। परिणामस्वभावा हि गुणा नाऽपरिणमय्य क्षणमप्यवतिष्ठन्ते। तस्मात् सत्त्वं सत्त्वरूपतया रजो रजोरूपतया तमस्तमोरूपतया प्रतिसर्गावस्थायामपि प्रवर्तते** (सांख्य-तत्त्वकौमुदी पृ.93)।

परन्तु सृष्टेः प्रारम्भिकसमये गुणानां विषमपरिणामो भवति अर्थात् सत्त्वं रजोरूपेण, रजस्तमोरूपेण इत्यादिरीत्या परिणमते। फलस्वरूपं, सत्त्वादिगुणानां साम्यावस्थायाः भङ्गो भवति, ततश्च जगत्संजायते। जगदुत्पत्तिप्रक्रियायां रजोगुणस्य प्रबलता (रजस्तमोऽभिभवद्वारेण प्राधान्यम्) आवश्यकी वर्तते, उत्पन्ने जगति गतिशीलतायाः क्रियाशीलतायाश्च अनुभूयमानत्वात्। रजोगुणे प्रबले सत्येव सम्पूर्ण-सूक्ष्मात्मकस्य जगतः प्रकाशहेतवे शब्दादितन्मात्रागतसात्त्विकांशानां मेलनेन अन्तःकरणस्य समुद्भवोऽजायत।

सम्पूर्णजगतः उत्पत्तिप्रवाहे शब्दतन्मात्रादयः अपि उत्पद्यन्ते, तास्वपि पूर्वोक्तनियमेनैव रजःप्राबल्यम् आविर्भवति, परन्तु अन्तःकरणस्य शब्दतन्मात्रादिभ्यः उत्पत्तये रजस्तमोऽभिभवद्वारेण सत्त्वप्राबल्यम् आवश्यकं वर्तते। एतदर्थं रजसः



प्रबलीभवनात्मकसामान्यप्रक्रियायां विरामः आवश्चकः, अन्यथा सत्त्वगुणस्य स्वात्मवृत्ति-लाभाय अवसर एव नोपलभ्येत। शब्दतन्मात्रादिषु विद्यमानसत्त्वगुणस्य उद्भूतत्वाभावे अन्तःकरणस्य उत्पत्तिरेव न भवेत्, तथा च प्रकाशकाभावे जगदान्ध्यं प्रसज्येत। अतएव तन्मात्रासु रजोगुणस्य प्रबलीभवनप्रक्रियायाः विरामप्राप्तये सत्त्वगुणस्य स्वात्मवृत्तिलाभाय च ईश्वरेच्छायाः पृथक् कारणत्वम् आवश्यकमिति वेदान्तसिद्धान्तः।

**(ग) द्वितीयः पर्यनुयोगः–रासायनिकप्रक्रियाविषयकः**–तन्मात्रासु अभिव्यक्त-सत्त्वांशानां मेलनेन मनसः उत्पत्तिर्भवति अर्थात् तन्मात्रासु अभिव्यक्तसत्त्वांशाः यदा परस्परं मिलन्ति तदा एव मन उत्पद्यते इति उक्तम्। अस्मिन् ब्रह्माण्डे एकः सार्वभौमनियमो विद्यते यत् अनेकवस्तूनां जडानां चेतनानां वा परस्पराकाङ्क्षां विना मेलनं नैव भवति। यदि शब्दतन्मात्रादिगतसत्त्वांशाः परस्परं मिलिताः भवन्ति तर्हि इदम् अवश्यं वक्तव्यं यत् तेष्वपि परस्परम् आकाङ्क्षा विद्यते। इदानीमेषः प्रश्नः समुदेति यत् कीदृशी सा आकाङ्क्षा यया प्रेरिताः सन्तः शब्दतन्मात्रादिगतसत्त्वांशाः परस्परं मिलन्ति?

**(घ) समाधानम्**–रासायनिकप्रक्रियाहेतुभूता आकाङ्क्षा एतस्याः जिज्ञासायाः समाधानाय प्रयतते–यदि एकं कारणं किमपि कार्यं जनयितुं स्वयं समर्थं न भवति, किन्तु अन्यकारणैः सह मिलित्वा तत्कारणम् उक्तकार्यजननाय योग्यं भवति, तर्हि तत्कार्यस्य उत्पत्तये तेषु कारणेषु परस्परं सम्बद्धीभवनाय एका प्रवणता दृश्यते, सा प्रवणता एव आकाङ्क्षापदार्थः। प्रकृते च सर्वविषयप्रकाशकम् अन्तःकरणात्मकं कार्यं जनयितुं शब्दतन्मात्रादिप्रत्येकगतसत्त्वांशः समर्थो नास्ति। तथाहि शब्दतन्मात्रायाः सत्त्वांशाद् उत्पन्नेन श्रोत्रेन्द्रियेण शब्दमात्रं प्रकाशते। एवं स्पर्शतन्मात्रादिगतसत्त्वांशाद् उत्पन्नेन त्वगिन्द्रियादिना स्पर्शादिमात्रं प्रकाशते। तेषां प्रत्येकशब्दतन्मात्रागतसत्त्वांशानां पृथक्पृथग्रूपेण अन्तःकरणोत्पादकत्वाभावेऽपि ते शब्दतन्मात्रादिगताः पञ्च सत्त्वांशाः सम्मिलितरूपेण अन्तःकरणम् उत्पादयितुं समर्थाः भवन्ति। अतएव सर्वविषया-वभासकस्य अन्तःकरणस्य उत्पत्तये शब्दतन्मात्रादिगतसत्त्वांशानां मध्ये परस्परं सम्बद्धी-भवनार्थं जायमानप्रवणता एव तेषाम् आकाङ्क्षा, एतया एव आकाङ्क्षया तन्मात्रासु अभिव्यक्तसात्त्विकांशानां परस्परं मेलनं भवति, ततश्च अन्तःकरणम् उपजायते।

## मनसः कार्यम्

उपर्युक्तालोचनया स्पष्टमिदं प्रतिभाति यत् ब्रह्माण्डीय इतिहासे मनस उत्पत्तिः

एका महत्त्वपूर्णघटना वर्तते। इदानीं विचार्यते यत् मनः कं कं कार्यविशेषं साधयति, येन तस्य उत्पत्तिः ब्रह्माण्डीयमहत्त्वपूर्णघटना संजाता।

**(क) प्रथमः कार्यविशेषः - चित्प्रतिबिम्बग्रहणम्–**मनसि सर्वत्र व्याप्तायाः विश्वचेतनायाः प्रतिबिम्बग्रहणसामर्थ्यं विद्यते। विश्वचेतना मनसि प्रतिबिम्बिता सती जीवभावं प्राप्नोति। प्रश्नः समुदेति यत् जडात्मकशब्दतन्मात्रादिगतसत्त्वांशकार्यत्वात् अन्तःकरणमपि जडम् एव, जडे च चित्प्रतिबिम्बग्रहणसामर्थ्यं कथं सम्भवति? अस्य प्रश्नस्य समाधानमेवमस्ति–जडत्वेऽपि अन्तःकरणस्य किञ्चिद्वैलक्षण्यं विद्यते। तथाहि अन्येषु कार्येषु सत्त्वं, रजः, तमश्चेति गुणत्रयं विद्यते, तस्मात् कारणात् तेषु स्वच्छता न विद्यते, किन्तु तानि सर्वाण्यपि रजस्तमोभ्यां प्रभावितानि वर्तन्ते, अतएव च तानि कार्यभूतानि वस्तूनि ब्रह्मचैतन्यं प्रतिबिम्बयितुं समर्थानि न भवन्ति। प्रकृते तु केवलसत्त्वांशकार्यत्वात् अन्तःकरणं स्वच्छम् (=रजस्तमोभ्याम् अनभिभूतम्) अतएव च निर्मलं (=शुद्धम् = अविमिश्रितं) च वर्तते, एतस्मादेव कारणाद् अन्तः-करणे चैतन्यस्य प्रतिबिम्बग्रहणसामर्थ्यम् अभिव्यनक्ति स्म। आचार्यमधुसूदनसरस्वती-महोदयेन उक्तम्-**दर्पणादिवत्स्वच्छत्वेन चित्प्रतिबिम्बग्राहकत्वाद्. . . .**। (सिद्धान्त-बिन्दुः पृ.62-63)।

स्वच्छं वस्तु अन्यान् विषयान् प्रतिबिम्बयितुं समर्थमस्ति यथा स्वच्छतया दर्पणे निर्मले जले वा वस्तूनि प्रतिबिम्बन्ते। पक्षान्तरे अस्वच्छतया प्रस्तरखण्डः स्वस्मिन् वस्तुनः प्रतिबिम्बं न गृह्णाति। इदमत्र अवधातव्यं यत् दर्पणः निर्मलजलं वा स्थूलविषयमेव प्रतिबिम्बत्वेन गृह्णाति, परन्तु अन्तःकरणे स्वच्छतया सह सूक्ष्मताया अपि विद्यमानत्वात् तत् सूक्ष्मतमस्य ब्रह्मचैतन्यस्यापि प्रतिबिम्बं गृह्णाति।

**(ख) द्वितीयं विशेषकार्यम् - सर्ववस्तुप्रकाशनम् –** आकाशादिपञ्चभूतसूक्ष्म-गतसत्तांशानां मेलनेन अन्तःकरणस्य उत्पत्तिरजायत अतएव अन्तःकरणं चक्षुरादिसर्व-ज्ञानेन्द्रियाणां रूपरसादिसर्वबाह्यविषयान् प्रकाशयति, सहैव सुखदुःखमोहादीन् आन्तरविष्ययान् अपि प्रकाशयत्यन्तःकरणम्। एतस्मादेव कारणात् मनः सर्ववस्तु-प्रकाशकम् इति कथ्यते। आद्यशङ्कराचार्येण मनसः सर्वविषयाऽवभासकत्वमेवं प्रतिपादितं-**तस्माद् यस्याऽसन्निधौ रूपादिग्रहणसामर्थ्यस्यापि सतः चक्षुरादेः स्वस्वविषयसम्बन्धे रूपशब्दादिज्ञानं न भवति, यस्य च भावे भवति तदन्यदस्ति मनो नाम अन्तःकरणं सर्वकरणविषययोगि इति अवगम्यते** (बृहदारण्यकोपनिषद् शाङ्करभाष्यम् 1.5.3)।



इदमत्रावधातव्यम् यत् सुखदुःखमोहादीनाम् आभ्यन्तरविषयाणां प्रकाशने मनः स्वतन्त्रं विद्यते। रूपरसादिबाह्यविषयप्रकाशने तु मनसः पारतन्त्र्यम् अस्ति, तस्य रूपादिना साक्षात्सम्बन्धाभावात् चक्षुरादिद्वारेणैव मनसः रूपादिना सह सम्बन्धभावात्। उक्तञ्च विदुषा-**परतन्त्रं बहिर्मनः**। (तत्त्वविवेकः, उद्धृतिः-सर्वदर्शनसंग्रहः, पृ.11)

## उपसंहारः

उपर्युक्तालोचनया सुस्पष्टं भवति यत् अस्मिन् ब्रह्माण्डे मनसः स्थानम् अतीव महत्त्वपूर्णं विद्यते। अद्वैतवेदान्तदार्शनिकैः मानवस्य आध्यात्मिकविकासे यथा मोक्षप्राप्तौ मनः कथम् उपयोगि भवति, केनोपायेन मनसः शुद्धिर्भवति, केन च ततः एकाग्रं भवति एतत्सर्वमवलम्ब्य अतिगहनम् अनुसन्धानं कृतं, फलस्वरूपम् अद्वैतवेदान्तदर्शने मानवस्य आध्यात्मिकविकासोपयोगिनो मनसः स्वरूपविषये कार्यशैलीविषये अतिविस्तृततथ्यम् उपलभ्यते। यथा कठोपनिषदि उक्तम्–

**नाविरतो दुश्चरितान्नाशान्तो नासमाहितः।**
**नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात्।**।(कठोपनिषत् 1.2.29)

यथा वा –

**मनसैवेदमाप्तव्यं नेह नानास्ति किञ्चन।** (कठोपनिषत् 2.1.11)

तथा मनसः शुद्ध्युपायविषये छान्दोग्योपनिषदि –

**आहारशुद्धौ सत्त्वशुद्धिः, सत्त्वशुद्धौ ध्रुवा स्मृतिः।** (छान्दोग्योपनिषद्)

तथापि व्यावहारिकजगति जागरणे स्वप्ने वा मनसः कार्यशैली किदृशी? मनसि प्रसन्नतायाः उदासीनतायाः वा सर्वजनानां कृते एकरूपेण किमस्ति निश्चितं कारणम्? एतत्सर्वम् अद्यावधि नैव सुस्पष्टं विद्यते। वस्तुतः व्यावहारिकजगति मनसः कार्यशैलीविषयकम् अतिविस्तृतं क्षेत्रं ज्ञानेन अप्रकाशितमेव वर्तते। अधुना एतेषां प्रश्नानां समाधानाय यद्यपि आधुनिकमनोविज्ञाने, तान्त्रिकविज्ञाने च गहनम् अनुसन्धानकार्यं प्रचलति, तथापि मुख्यतया रोगनिवारणार्थमेव तत्र तत्र प्रयासो विधीयते। अतएव अद्वैतवेदान्तदर्शनदृष्ट्यापि व्यवहारिकजगति मनसः कार्यशैलीविषये निरन्तरानुसन्धानस्य आवश्यकता विद्यते इति मन्यामहे वयं, येन मनसः विषये पूर्णं ज्ञानमुपलभ्येत।

# किञ्चित् पारिभाषिकम्

**काशिकावृत्तौ अष्टाध्यायीगतानां सूत्राणां शब्दाः यथा परिभाषिताः तथा सूत्र–तत्संख्योल्लेखपुरःसरम् अध्यायक्रमेणात्र संगृह्यन्ते।**
**अ० = अष्टाध्यायी। वा० = वार्तिकम्**

| | |
|---|---|
| ताच्छील्यम् | ताच्छील्यं तत्स्वभावता। का. आञि ताच्छील्ये 3.2.11 |
| | का. कृञो हेतुताच्छील्यानुलोम्येषु 3.2.20 |
| | पुष्पाहरः। फलाहरः। पुष्पाद्याहरणे स्वाभाविकी फलानपेक्षा प्रवृत्तिरस्य इत्यर्थः। |
| हेतुः | हेतुः ऐकान्तिकं कारणम्। (शोककरी कन्या) |
| आनुलोम्यम् | आनुलोभ्यम् अनुकूलता। (प्रैषकरः) |
| | का. कृञो हेतुताच्छील्यानुलेम्येषु 3.2.20 |
| भृतिः | भृतिः वेतनम् |
| | का. कर्मणि भृतौ 3.2.22 |
| फलेग्रहिः | फलानि गृह्णातीति फलेग्रहिः वृक्षः। |
| आत्मम्भरिः | आत्मानं बिभर्ति आत्मम्भरिकः। |
| | का.फलेग्रहिरात्मम्भरिश्च 3.2.26 |
| चकारः | अनुक्तसमुच्चयार्थः चकारः। |
| | का. नाडीमुष्ट्योश्च 3.2.30 |
| व्रतम् | व्रत इति शास्त्रतो नियम उच्यते। |
| | का. वाचि यमो व्रते 3.2.40 |
| | कामचारप्राप्तौ नियमः–सति शयने स्थण्डिले एव शेते नान्यत्र। सति भोजने अश्राद्धमेव भुङ्क्ते न श्राद्धम्। |
| | का. व्रते 3.2.80 |
| ऋत्विक् | ऋतौ यजति/ऋतुं यजति ऋतुप्रयुक्तो यजति (ऋतु–यज् क्विन्) |
| दधृक् | धृष्णोतीति दधृक् (धृष् + क्विन्) |
| स्रक् | सृजन्ति तामिति स्रक् (सृज् + क्विन्) |
| दिक् | दिशन्ति तामिति दिक् (दिश् + क्विन्) |
| | का. ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिकुञ्चां च 3.2.59 |



## भारतीयसमाजव्यवस्थायां व्यक्तित्वनिर्माणे व्रताचरणस्य भूमिका

**प्रो. राधामाधवदाशः**

### भूमिका

व्रतपर्वोत्सवानुष्ठानं भारतीयसमाजव्यवस्थायाः लौकिक्यास्तथाऽऽध्यात्मिक्याश्चोन्नतेः उत्तमं साधनम्। तेषामनुष्ठानेन उदात्तजीवनं जीवितुं प्रेरणा लभ्यते। दुःखभयशोकमोहाऽज्ञानादीनामात्यन्तिकनिवृत्तिपूर्वकमखण्डानन्दावाप्तिरेव व्रतादीनां परमं लक्ष्यमिति सार्वजनीना परम्परा भारतीयसंस्कृतौ इतरसंस्कृतिषु च प्रसिद्धा। व्रतपर्वणोरनुष्ठानेन मानवा अन्तर्मुखिनो भवितुं प्रेरिता भवन्ति। एतेषामङ्गभूतस्नानपूजनजपदानहवनध्यानादिकृत्यानि वस्तुतो व्रतरूपाणि सन्ति। तानि कृत्यानि मानवीयबाह्यवृत्तिमन्तर्मुखीकर्त्तुं समर्थानि भवन्ति। किमर्थं व्रतमाचरणीयमित्युच्यते केनचन मनीषिणा–[1] प्रकृतिसृष्टभेदातिक्रमणमेव लक्ष्यमिति। परमात्माधिष्ठित–कोटिशः प्राकृतिकभेदाः व्यवहारस्य साधकाः प्राप्यन्ते न तु बाधकाः। क्षित्यादिपञ्चमहाभूतेषु उद्भिज्ज-स्वेदज-अण्डज–जरायुज–मनसिज–स्वयम्भूप्राणिषु स्त्रीपुरुषयोश्च स्वराकृतिप्रकृत्यादिषु पारस्परिकभेदा निसर्गसिद्धाः। तथैवाऽपरिमिता दृश्यमाना भेदाः सर्वत्र परस्परं सानुकूला हितप्रदाः सुखदाः सन्ति। किन्त्वविवेकितामूलका अदूरदर्शपरकास्तथा रागद्वेषपूर्वका निरूपिता भेदा अवश्यमेव विघातकाः सन्तः परस्परं विघटन्ते। विना वेदादिशास्त्रमूलकव्रतोपवासादिपरकविधिविधानरूपाऽऽलम्बनेन भेदानां सदुपयोगो न संभवति नापि भेदभूमेरतिक्रमणं जायत इत्यभेदवादिभिर्ज्ञातव्यमिदम्। यदुक्तं महाभारते अनुशासनपर्वणि, 164/11-12[2]

**पञ्चभूतशरीराणां सर्वेषां सदृशात्मनाम्।**
**लोकधर्मे च धर्मे च विशेषकरणं कृतम्।।**
**यथैकत्वं पुनर्यान्ति प्राणिनस्तत्र विस्तरः।**

व्रतपर्वोत्सवानामनुष्ठानबलेन सामाजिकभ्रातृत्वबन्धने दृढ़ता पारस्परिकमैत्री विश्वासप्रतिष्ठा तथा सांस्कृतिकचेतनाया उत्तरोत्तरसंवर्धनादिलक्ष्यं सुतरां सिध्यतीति

न काचिद्विप्रतिपत्तिः। **संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्, समानी व आकूतिः समाना हृदयानि वः समानमस्तु वो मनः।** इत्यादिमन्त्रेष्वभिप्रेतस्य सांमनस्यस्य सामरस्यस्य च प्रतिष्ठया सामाजिकक्षेत्रे न काऽपि सिद्धिर्दुरापाऽस्ति। वैयक्तिकसिद्धिर्दुर्वारेति शास्त्रवचनमदृष्टजननेन पुण्यार्जनफला। संस्कारित-शृङ्खलित-संयमित-व्रतोत्तीर्णमानवस्य रोगवर्जितस्वास्थ्यलाभदृढमनस्कतादि दृष्टप्रयोजनम्। व्रतपालनेनाऽभ्युदयनिःश्रेयससिद्धिर्भवतीत्याप्तवाक्यं[3] प्रमाणम्। अत एव भुवि सर्वत्र स्वदेशकालरुचिरसंस्कृत्यनुकूलं व्रतपर्वोत्सवा अनुष्ठीयन्ते। यावत्कालं पृथिव्यां मानवसमाजः स्थास्यति तावदेव तेषां प्रासङ्गिकता समनुभविष्यत इति वक्तुं युज्यते।

## व्रतम्

अपौरुषेयवेदा व्रतानां शाश्वतमूल्यबोधमुपदिशन्तः समामनन्ति-

**व्रतेन दीक्षामाप्नोति दीक्षयाऽऽप्नोति दक्षिणाम्।**
**दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते।।** (यजुर्वेदः 1.5)।

अस्यार्थोऽस्ति-व्रतधारणेन मानवो दीक्षितो भवति। दीक्षाबलेन दाक्षिण्यं दक्षता निपुणता वाऽऽर्ज्यते। दाक्षिण्ये सति श्रद्धाभावो जागरितो भवति। श्रद्धया सत्य-स्वरूपब्रह्मणः प्राप्तिः भवति-**अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यताम्। इदमहमनृतात्सत्यमुपैमि।** (यजुर्वेदः 1/5) हे व्रतरक्षक अग्निदेव व्रतमाचरिष्यामि, व्रताचरणाय सामर्थ्यं मयि निधेहि। मामकमिदं व्रतं निर्विघ्नं परिसमाप्नुयात्। असत्याद् दूरे तिष्ठन् व्रतमहं सत्यमाचरेयम्। आशिषमेतां मह्यं प्रयच्छ।

**व्रतेन त्वं व्रतपते समक्तो विश्वाहा सुमना दीदिहीह।**
**तं त्वा वयं जातवेदः समिद्धं प्रजावन्तं उप सदेम सर्वे।।**

हे व्रतानां स्वामिन् अग्निदेव! व्रतानुष्ठानेन भवान् सम्यक् प्रसन्नो जायते। सदैव प्रसन्नमनास्सन् मम सद्मनि प्रकाशाय कृपां कुरु। हे एतादृशगुणसम्पन्न तथा सम्यक्प्रकाशमान जातवेदः! पुत्रपौत्रादिभिर्युक्ता वयं भवत उपासनायां निरताः स्याम।

तथैव छान्दोग्योपनिषदि[4] सामव्रतानि इत्यधिकरणे सामगानकृतवद्भ्य उपासकेभ्यो व्रतरूपेणोपदिष्टा मन्त्राः प्रणिधेयाः। नास्ति सन्देहो यद् व्रताङ्गत्वेनानुष्ठीयमानानां ध्यानचिन्तनानुभवबलेनोदात्तव्यक्तित्वनिर्माणे प्रेरणा हृदयस्पर्शिनी संलक्ष्यते। तेषां सामव्रतानां प्रारम्भिको मन्त्रोऽस्ति-**महामनाः स्यात् तद् व्रतम्।** उदारहृदयवत्ता



भवति व्रतरूपम्। कस्यापि सहजसाध्यवस्तुनो लाभाय व्रताचरणं नाऽपेक्ष्यते। दुर्लभा प्रयत्नसाध्या च या प्राप्तिः सा व्रतसापेक्षा। क्षुद्रं च मनो व्रतं धारयत् शनैः शनैः पूर्णतापथि अग्रेसरद् विपुलतां समीयात्। प्रकरणेऽस्मिन्नग्रिममुपदिश्यते **तपन्तं न निन्देत्तद्व्रतम्।** उत्तापो वर्द्धते निन्दां मा कुरु। सूर्यनारायणस्तीव्र उष्मायुक्तो भवति। कथमपि स सोढव्य उपायचिन्तां कुरु। **वर्षन्तं न निन्देत्तद्व्रतम्।** वर्षतो मेघस्य निन्दामकृत्वा तदनुकूलजीवनपद्धतिं संस्धेहि। **ऋतून्न निन्देत्तद्व्रतम्।** अपरेऽपि ऋतवः समागमिष्यन्ति, तेषामपि निन्दा न करणीया। पुनरग्रे ऋषिः निर्दिशति-दुष्करमस्ति तत्त्वं तत्तितिक्षस्व। तद्यथा **लोकान्न निन्देत्तद्व्रतम्।** यान् वयमवलोकयामो ये वाऽस्मानवलोकयन्ति तेषां जनानां निन्दां मा कुरुत। गीताया द्वादशाध्याये भक्तियोगेऽपि स्वस्य परमभक्तलक्षणं निरूपयता भगवता तुल्यमभिहितमस्ति-

**यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः।**
**हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः।।**

सामव्रतेषु पुनरुच्यते **पशून्न निन्देत्तद्व्रतम्।** गवादयः सर्वे पशव उपकारिणः सन्ति, तान्न निन्देत्। व्रतान्तरमपि निर्देशितम्-**मज्झो नाश्नीयात्तद्व्रतम्।** मत्स्यमांसादि न भक्षयेदेतदपि व्रतम्। अन्तिमव्रतमस्ति **सर्वमस्मि इति उपासीत।** एतेषामुपदेशानां ध्यानपूर्वकं चिन्तनं मननं च करणीयं येनाऽहं सर्वमस्मीत्यनुभवः जागृयात्। अतो **महामनाः स्यात्** इत्युपक्रम्य **सर्वमस्मि** इतिमन्त्रान्तमुपदिष्टं व्यक्तित्वसंधारकं निखिलं व्रतमान्तरिकं मनःसंवेद्यं न तु बाह्यम्।

## व्रतशब्दोऽयं यौगिकः

**व्रतमिति कर्म नाम वृणोतीति सतः। इदमपितरद् व्रतमेतस्मादेव। निवृत्तिकर्म। वारयतीति सतः। अन्नमपि व्रतमुच्यते। यदावृणोति शरीरम्।।** इति निरुक्तम्।[5] व्रियते इति व्रतम्। अतो व्रतशब्दस्य वरण-ग्रहण-अनुपालन-आचरण-अनुष्ठानादयोऽर्था भवन्ति-शब्दोऽयं वृञ् वरणे, वृतु वर्तने, वृतु वरणे, वृतु व्यवहारे तथा व्रति नियमने इत्याद्यर्थेषु निष्पादयितुं शक्यते। धातूनां बह्वर्थत्वात् धातुजानां यौगिकानां शब्दानामर्थभूयस्त्वं तथा स्वाभाविकम्। रूढार्थस्तु-आत्मशोधनार्थं क्रियमाणानां विधिसम्मतानामुपायानां दृढतया स्वीकरणम्। फलतो व्रतशब्दः पुण्यजनकोपवास-नियम-निष्ठाऽनुष्ठान-नियमन-निषिद्धवस्तुवर्जन-संकल्प-संयम-नियामक-नियमविधि- कर्त्तव्यकर्माद्यर्थानां वाचकरूपेण शास्त्रेषु प्रयुक्तः प्राप्यते।

**व्रताद् भोजनं तन्निवृत्त्यो** रिति पाणिनिसूत्र (3.1.21) गत-वार्त्तिक-बलेन व्रतशब्देन भोजनार्थे तथा भोजनवर्जनार्थे णिच्-प्रत्ययो विधीयते। तथा च महाभाष्ये पयो व्रतयति, पयो भुङ्क्ते, शूद्रान्नं व्रतयति, निषिद्धान्नं वर्जयति प्रभृत्यर्थाः प्रसिद्धाः सन्ति। **नियमो व्रतमस्त्री तच्चोपवासादिपुण्यकमिति** अमरकोषोक्तं (3.1.22) प्रमाणम्। अस्य कोशगता अर्था नैके सन्ति, यथा-धार्मिककृत्य-धार्मिकानुष्ठान-नियम-संयम-प्रतिज्ञादयः। शास्त्रसम्मतनियमपालनं व्रतमित्यग्निपुराण उच्यते।

**शास्त्रोदितो हि नियमो व्रतं तच्च तपो मतम्।**
**नियमास्तु विशेषास्तु व्रतस्यैव दमादयः।।**
**व्रतं हि कर्तृसंतापात्ताप इत्यभिधीयते।**
**इन्द्रियग्रामनियमान्नियमश्चाभिधीयते** ।।(अग्निपुराणे 175/2-3)

अत एव व्रतस्थो नाम नियमस्थः। व्रतधारणेन क्रमशो मानवीयदुर्गुणानां कषायकल्मषानां निष्कासनं, संस्काराणां चोदात्तीकरणं संभवति। व्रतमस्ति अध्यात्ममार्गे अग्रेसराणां मानवानां पाथेयरूपम्। व्रतेन संकल्पशक्तेर्विकासो भवति। अत एव कस्यचित्सत्कार्यस्य संपूर्त्तये संकल्पोऽपि व्रतस्वरूपः। हेमाद्रिव्रतखण्डे व्रतलक्षणप्रसङ्ग उच्यते-**व्रतं च सम्यक् संकल्पजनितानुष्ठेयक्रियाविशेषरूपम्**। उच्चस्तरीय-नियमानां प्रतिज्ञापूर्वकपालनमपि व्रतपर्यायम्। शास्त्रकारास्तितिक्षां सहनशीलतां वा व्रतस्य महत्त्वपूर्णाङ्गत्वेन निरूपयन्ति। उपवासाऽस्वादमौनादीनां व्रतमपि नैकदिशासु विक्षिप्तानां शक्तीनामेकीकरणमुखेनाऽभीष्टदिशि प्रवर्त्तनाय इष्यते। मनःशुद्धये समाधये च व्रतपालनमपरिहार्यम्। यथोक्तं श्रीमद्भागवते-

**दानं स्वधर्मो नियमो यमश्च श्रुतं च कर्माणि च सद्व्रतानि।**
**सर्वे मनोनिग्रहलक्षणान्ताः परो हि योगो मनसः समाधिः।।**[6]

एताभ्यां विना सुखोपलब्धिः नैव सम्भवति। दूषितवस्तूनां निवृत्त्या तद्विषयककामना निवृत्ता भवन्ति। तथा सति चित्तस्य नैर्मल्ये नैश्चल्ये च संजाते चित्तोपरि सुखरूपात्मनः स्फूर्त्तिरेव सुखानुभूतेः रहस्यम्। एतस्य रहस्यस्याऽवबोधो नाम सिद्धिरभ्युदयस्य। व्रतादिसुलभवैराग्येण निःश्रेयसाप्तिं प्रतिपादयता भगवतोच्यते-

**बाह्यस्पर्शेष्वशक्तात्मा विन्दत्यात्मनि यत्सुखम्।**
**स ब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते।।**[7]

निश्चलजगत्पालको विष्णुरुच्यते सुव्रत इति। अत्र व्यवस्थानियामक इत्यर्थः



महाव्रती भीष्म इत्यत्र दृढसंकल्पो भीष्म एवार्थः। तथैव रामायणमहाभारतपुराणादिषु व्रतनिष्ठाप्रसङ्गे विविधकथानकमुखेन पात्राणां व्रतप्रसिद्धिः वर्त्तते-यथा भगवान्स्वयं शरणागतरक्षणैकव्रतपालनपरायणः। रामस्य सत्यव्रतं हनुमतः सेवाव्रतं पार्वत्या-स्तपोव्रतं भक्तराजप्रह्लादस्य शीलव्रतं दिलीपस्य गोसेवाव्रतं परहितचिन्तनरूपं सतां सहजव्रतमित्येवंक्रमेणाऽवश्यकर्त्तव्यभावनयाऽऽत्मनिदिध्यासनमेव व्रताचरणस्य ध्येयं प्रतिभाति। कठिनपरिस्थित्यामप्याऽऽचरणशुद्धेरपरित्यागो व्रताभिधेयोऽस्ति। प्रतिकूल-परिस्थितावपि प्रसन्नतामविहाय जीवननिर्वहणमपि व्रतसंज्ञामर्हति। महत्यामप्यापदि धर्मादनपेतः पुरुषो दृढव्रत इति प्रशस्यते यथा पुरुषोत्तमः श्रीरामः। मध्यकालीने तथाऽधुनिके समये च जगद्गुरुशङ्कराचार्य-श्रीरामकृष्णपरमहंसादिभिः महापुरुषैः संस्थापिता व्रतनिष्ठा युगे युगेऽनुकरणीया निखिलमानवानाम्। योगशास्त्रप्रसिद्धानामहिंसासत्याऽस्तेय-ब्रह्मचर्यापरिग्रहाणां यमानां शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानां नियमानामपि व्रतसंज्ञा युज्यते-

**क्षमा सत्यं दया दानं शौचमिन्दियनिग्रहः।**
**देवपूजाग्निवहनं सन्तोषः स्तेयवर्जनम्।।**

व्रतधारिणः एतानि सर्वाणि प्रतिष्ठितानि भवन्तीति भविष्यपुराणोक्तिरवधेया।[8] गरुडपुराणे व्रतधारिभिः क्रोधलोभमोहाः सर्वथा त्याज्या इति विधानं निरूपितम्। सर्व एते दिव्यगुणा भगवता श्रीकृष्णेनाऽभिजातस्य दैवीसंपद्व्यपदेशेन गीतायामप्युप-दिष्टाः।[9] अत एव व्रतयोग्योऽथवा व्रताधिकारी को भवितुमर्हतीति विचारस्याऽपेक्षा नूनं वर्त्तते यतो हि व्रताचरणमवश्यमेव कठिनमायासससाध्यम्। हेतुनानेन निष्ठापर-व्रताधिकारवतां व्यक्तित्वमसाधारणमिति प्रणिहातुं शक्यते।

## व्रतयोग्यता

व्रताधिकारिणो योग्यतां निरूपयति स्कन्दपुराणे[10] उक्तमस्ति यद्वर्णाश्रमधर्मपालनकारी शुद्धमना निर्लोभः सत्यवादी सकलप्राणिकल्याणपरः संकल्पितव्रतं प्रति निष्ठावान् पापभीरुर्मददम्भविवर्जितः पूर्वं निश्चितव्रतापेक्षिनियमादीनां यथायथपालनशीलो बुद्धिमान्पुरुष एव व्रताधिकारी भवितुमर्हति। पूर्वोक्तगुणसम्पन्ना ब्राह्मणक्षत्रियवैश्यशूद्राः स्त्रीपुरुषाः सर्वे व्रताधिकारिणः सन्ति।

**व्रतोपवासनियमैः शरीरोत्तापनैस्तथा।**
**वर्णाः सर्वेऽपि मुच्यन्ते पातकेभ्यो न संशयः।।**

सौभाग्यवती स्त्री पत्युरनुमत्या व्रतधारणं कर्त्तुमर्हति।

**नारी च खल्वनुज्ञाता पित्रा भर्त्रा सुतेन वा।।**
**विफलं तद् भवेत्तस्या यत्करोत्यौर्ध्वदैहिकम्।।**[11]

कूर्मपुराणे[12]

**व्रतोपवासनियमैर्होमस्वाध्यायतर्पणैः।**
**तेषां वै रुद्रसायुज्यं सामीप्यं चातिदुर्लभम्।।**
**सालोक्यता च सारूप्यं जायते तत्प्रसादतः।।**

इत्यनेन देवदुर्लभ-सायुज्य-सामीप्य-सालोक्य-सारूप्य-मुक्तिप्रदानशीलस्य व्रतस्याधिकारी कोऽपि पुरुषश्रेष्ठो विलक्षणव्यक्तित्वभागेव स्यादिति नास्ति विचिकित्सा। व्रतस्य क्षमादिदशसामान्यधर्मविषये[13] यदुच्यते तदपि व्रताधिकारिणो वैलक्षण्यं द्योतयति। ते यथा-

**क्षमा सत्यं दया दानं शौचमिन्द्रियनिग्रहः।**
**देवपूजाऽग्निहवनं सन्तोषोऽस्तेयमेव च।।**
**सर्वव्रतेष्वयं धर्मः सामान्यो दशधा स्थितः।।**

व्रतेषु वर्ज्यनियमानां[14] पालनमप्युपदिष्टम्-उपवासव्रती दन्तधावनं हिंसनमनृतं द्यूतं चौर्यमसकृज्जलपानं सकृत्ताम्बूलभक्षणं स्त्रीसंयोगं दिवास्वापं मांसं च वर्जयेत्। अग्निपुराणानुसारमष्टौ यानि व्रतघातकानि न सन्ति तानि भवन्ति- जल-मूल-फल-दुग्ध-हविष्य-ब्राह्मणेच्छापूर्ति-गुरुवचन-औषधानि।[15]

## उत्तरकालीनपर्वोत्सवादीनामङ्गत्वेन व्रताचरणम्

प्रतीयते यद्वेदोत्तरकाले पुराणेषु देवदेवीनां तेषां संबद्धानां घटनानां च विकासहेतोः लौकिकपारलौकिकसुखादिकामनया किमपि दैवतत्त्वं संकल्प्य व्रतधारणनियमः सार्वजनीनो विहितः। व्रतविशेषाणां विशिष्टफलं तत्तद्व्रतस्तुतिषु निरूपितम्। सैव व्रतानां फलश्रुति-र्व्रतविशेषधारणाय मानवान् प्रेरयति। पूर्वोक्तानां सर्वेषां व्रतनियमानां सम्यक्पालनं सामान्य-जनस्य कृते यद्यप्यायासकरं तथापि **'स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयाद्'**इति गीतोक्तदिशा भारतवर्षे सार्वजनीनतया यावच्छक्यं व्रतपालने कुण्ठा न दृश्यते। पौराणिक-साहित्येऽर्वाचीनप्रादेशिकलोकसाहित्ये लोककथायां चोपदिष्टा भूयांसो व्रतप्रकारा आभारत-वर्षं भारताद् बहिरपि भारतजैः पाल्यन्ते। व्रतकर्म प्रमुखतया विविधदेवदेवीनां जन्माऽऽ-विर्भावोपलक्षकपर्वोत्सवपालनानुबन्धीनि तदङ्गभूतान्युपवासादिकर्माणि अभिप्रयन्ति।



## व्रतफलं दृष्टमदृष्टं च

उपर्युक्तैहिकपारलौकिककामनावतां व्रतधारणं कुर्वतां जनानां यमनियमपालनं देवाराधनमनुलक्ष्यं जागरुकता इति त्रीणि मुख्यध्येयानि सन्ति। एतेषामनुष्ठानेनाऽ-न्तःकरणशुद्धिर्नूनं जायते। बाह्यवातावरणेऽपि पवित्रता समुदेति। व्रतपर्वणोरनुष्ठानेन मानवा अन्तर्मुखिनो भवन्ति। संकल्पशक्तिश्च द्रढीभवति। मानसिकी शान्तिरुदेति। ईश्वरभक्तिः समुल्लसति। भौतिकदृष्ट्या स्वास्थ्यलाभस्त्वनिवार्य एव। अथ च रोगाणामात्यन्तिकनिवृत्तिस्सुलभा भवति। अत एव कायिक-वाचिक-मानसिकानि संसर्गजानि पापोपतापमहापापानि व्रतेन दूरीभवन्तीति व्रतफलश्रुतिवचनानि प्रथन्ते। व्रताचरणेन दिव्यगुणानामुत्तरोत्तरं संस्कारवृद्धिर्भवति। नायमतिवादो यद् व्रतधारणेन मानवे श्रेष्ठकर्मसम्पादनाय योग्यता समायाति इति। विषमावस्थातोऽग्रे सर्तुं शक्तिर्लभ्यते। आत्मविश्वासो वरीवृध्यते। अनुशासनस्य भावनाऽपि विकसति। व्रतपालनमात्मज्ञानलाभ-रूपमहल्लक्ष्याय प्रारम्भिकं सोपानमस्तीति नात्युक्तिः। कठोपनिषदनुसारं जीवस्य परमं लक्ष्यमस्ति व्रत-संयम-नियमपालनपूर्वकं मनोबुद्ध्योः नियन्त्रणं संपाद्य इन्द्रियाणि च निगृह्य श्रेयोमार्गेण गमनम्।[16]

## व्रतभेदाः

उपवाससहितो निराहारकोऽथवा संयमिताहारग्रहणपूर्वकः कोऽपि व्रतं धारयेत्। कायिकवाचिकमानसिकभेदेन व्रतं त्रिधा। हिंसादीनां त्यागः कायिकं वचनपारुष्य-पिशुनतानिन्दादिवर्जनपूर्वकं सत्य-हित-परिमितभाषणं वाचिकं काम-क्रोध-लोभ-मोह-मद-मात्सर्याणां तथा च रागद्वेषादीनाम् असाहित्यं मानसिकमस्ति व्रतम्। परन्तु प्रमुखरूपेण नित्य-नैमित्तिक-काम्यभेदेन व्रतं त्रिधा मतम्। निरन्तरकर्त्तव्यभावनया भगवत्प्रसन्नतायै क्रियमाणं व्रतमस्ति नित्यव्रतम्। एकादशी-प्रदोष-पूर्णिमादि-व्रतानि नित्यप्रकारकाणि। पापक्षयादिनिमित्ताय कृतानि चान्द्रायणादीनि नैमित्तिकव्रतानि। विशिष्टकामनां हृदि निधाय कन्यादिद्वारा समाचरितानि गौरीव्रत-वटसावित्रीव्रतादीनि काम्यव्रतपर्यायाणि।

## पर्वाङ्गत्वेन व्रताचरणम्

व्रताचरणस्य क्लेशकाठिन्यादीनामपनोदनमुखेन तज्जनीरसतां हर्षोल्लासरसेन प्लावयितुं पर्वोत्सवाद्यङ्गत्वेन व्रतपालनस्य विधयोऽपि धर्मशास्त्रपुराणादिषु निरूपिताः। पर्वपदेन सन्धिकालोऽभिप्रेतः। अतः सन्धिकालजानि पूर्णिमाऽमावस्याऽष्टमीसंक्रान्त्यादीनि पर्वाभिधेयानि। नित्यनैमित्तिककाम्यभेदेन पर्व त्रिविधम्। सन्ध्याद्यारभ्य एकादशी-

प्रदोषदीपावलीहोलिकापर्वाणि नित्यानि। ग्रहणोपराग-कुम्भ-पुत्रजन्मग्रहनक्षत्रादीनां योग-विशेषा नैमित्तिकपर्वाणि। ग्रहदोषशमनाय विहितं व्रतं पुत्रकामनया च क्रियमाणपयोव्रतादीनि काम्यपर्वाणि। दिव्यपर्व-देवपर्व-पितृपर्व-कालपर्व-जयन्तीपर्व-प्राणिपर्व-वनस्पतिपर्व-मानवपर्व-तीर्थपर्वप्रभृतीनि पाल्यन्ते येषु व्रतमस्त्यनिवार्यमङ्गम्। कुम्भसंक्रान्ति-वारुणीग्रहणादीनि दिव्यपर्वाणि।[17] पर्वस्वनुष्ठीयमानकर्मविशेषाधारेण स्नानव्रत-यज्ञोपासनाऽनुष्ठानमहोत्सवानां प्राधान्यदिशा कानिचन व्रतानि सन्ति स्नानप्रधानानि। एवं व्रतप्रधानानि यज्ञप्रधानानि इत्येवंक्रमेण व्रतानां श्रेणीविभागो युज्यते। विस्तारभिया प्रत्येकमालोचयितुं न शक्यते। तथाप्याधुनिकमानवस्य कृते किमर्थं व्रतमाचरणीयमिति पूर्वालोचितमाध्यात्मिकफलमतिरिच्य केषुचिदेषु प्रायोगिकं दृष्टफलकं युक्तियुक्त-मुत्तरमनुसंधातुं शक्यम्। स्थालीपुलाकन्यायेन कानिचनोदाहरणानि प्रस्तूयन्ते यथा-ग्रहणोपरागादिदिव्यपर्वसु विहितं व्रतं चन्द्रसूर्ययोः संबद्धमत एव तयोरभिलक्षकं तद्व्रतमवश्यं मनश्शरीरहिताय भवति। गणेशचतुर्थी-एकादशी-प्रदोषादिदेवपर्वहेतुक-व्रतपालनेन मानवो देवशक्तेरनुग्रहं लभते। शुक्लपक्षकृष्णपक्षौ यथाक्रमं देवानां कार्यकालविश्रान्तिकालावभिहितौ। तथैव निर्दिष्टदिवसेऽपि विशिष्टग्रहस्य प्रभावानु-रूपव्रताचरणेन दिव्यलाभो भवति। आश्विनकृष्णपक्षे पितृपर्वणि विहितं पिण्डदान-ब्राह्मणभोजनादिपितृव्रतं पितृतृप्तये सहजमाध्यमम्। चैत्रशुक्लप्रतिपदादयो युगसंवत्सरादि-द्योतकाः कालपर्वाभिधेया अवसरा देवपर्वसमफलदातारः सन्ति। भगवदवताराणां तत्सान्निध्यभाजां महापुरुषाणां च जन्मदिवसपालनरूपव्रताचरणेन परमपावनस्य दिव्यचरित्रस्य चरितं स्मर्यते। एतेन व्यक्तिरन्तर्मुखिनी भवति। भारतवर्षे रामनवमी-जन्माष्टमी-शिवरात्रि-नृसिंहचतुर्दशी-वामनद्वादशी-हनुमज्जन्म-गणेशचतुर्थी-परशुरामजन्मादीनि जयन्तीपर्वाभिधेयानि व्रतपालनाय सुमहदवसरं ददति। नागपञ्चमीगोपाष्टम्यादिदिव्यप्राणिनां पूजनमभिलक्ष्य पालनीयं व्रतं यथाशास्त्रमदृष्टजनकं सत् प्राणिसुरक्षात्मक-परिवेशसन्तुलनाय चेतयति मानवान्। शनिवासरे विहितमश्वत्थवृक्षपूजन-नित्यकर्मतया तुलसीपूजनं पुनर्विशिष्य कार्त्तिकमासे वैकुण्ठचतुर्दश्यादितिथिषु विहितं व्रताङ्गत्वेन तत्पूजनममावस्यायां वटवृक्षपूजनं सोमवासरे विल्ववृक्षपूजनं बृहस्पतिवासरे च कदली-वृक्षोपासनमेतेषां दिव्यवृक्षाणां कल्याणकारिगुणमहिमादिस्मरणाय भवत्येव। परिवेशसुरक्षायै प्रोत्साहनमपि गर्भितमुद्देश्यम्। सन्तानजन्मोत्सव-विवाहमहोत्सव-नवगृहप्रवेश-नवान्न-भोजनादिपर्वावसरे विहितव्रतानि मानवपर्वाणीति विविच्यन्ते। अवसरेष्वेषु व्रतचारी प्रमत्तो न भवेन्नापि भौतिकसमृद्धिलाभेन बहिर्मुखी गर्वितः च भवेत्तन्मूलिका सावधानता



विधेया। प्रयागे माघमासि तथैव तीर्थान्तरे विशिष्टग्रह-योगप्रभावेण पालितानि निखिलतीर्थपर्वाणि तीर्थानां पावनप्रभावं भावयन्ति नियमपूर्वकव्रतोपवासैरुत्तमस्वा-स्थ्यलाभो दीर्घायुःप्राप्तिश्च भवतीति आयुर्विज्ञानसिद्धान्तः। व्रतोपवासेनाऽरुच्यजीर्णोदर-शूलमलावरोधशिरोवेदनाज्वरादिसामान्यरोगप्रशमनेन सह महाव्याधयोऽपि निर्मूला भवन्तीति सर्वेषामनुभवः। एतदर्थं सर्वासु संस्कृतिषु देशधर्मनैरपेक्ष्येण पालितयोर्व्रतोपवासयो-र्महत्त्वपूर्णा भूमिका वर्त्तते।

## व्यक्तित्वनिर्माणे आचारशक्तेः विशिष्टं योगदानम्

मानवजातेरभ्युदयायाऽऽचारशास्त्रस्य परम्परा भारतवर्षेऽनादिकालतः प्रचलिताऽ-स्ति। आचरणशुद्धिरेव तत्त्वतो व्रतमिति पूर्वत्र व्रतशब्दविश्लेषणव्यपदेशेन स्पष्टीकृतम्। "अग्ने व्रतपते..." इत्यादिमन्त्रैर्वेदाशयः स्फुटोऽस्ति। अत एव व्रतानि वैयक्तिकजीवनं पुनातितराम्। व्रताङ्गरूपोपवासब्रह्मचर्यमौनैकान्तसेवाऽऽत्मनिरीक्षणाद्याचरणजातं सामान्यमपि जनमसामान्यं परिणमयति। दुर्गुणानपहाय सद्गुणधारणार्थं क्रियमाणे देवपूजने विहितसंकल्प आत्मनिरीक्षणबलेन व्यक्तित्वनिर्माणायोपादानं भवति। मौलिकरूपेणाऽध्यात्ममर्मशिक्षणं गुणकर्मस्वभावानां विकासायोपदेशनं सन्मार्गमभिनिवेशन-मित्येवंक्रमेण व्रताचरणस्य तात्पर्यं सुनागरिकनिर्माणाय समर्थमस्ति। भारतीयसंस्कृतौ व्रतमेवोत्थानसोपानं जीवनस्य। यो धार्मिकोऽस्ति सोऽपि व्रती स एव चरित्रवानिति कथने नास्त्यत्युक्तिः। तदर्थं यजुर्वेदः 4/11 उपदिशति-'**व्रतं कृणुत।**' हे मानव व्रतं धारयत इति।

## उपसंहारः

अन्तिमविवक्षारूपेण वक्तव्यमिदं यद्व्रताचरणसिद्धान्तो जातिनिर्माणायाऽलमस्ति। प्रतिव्यक्ति व्रती चेद् भवेदस्माकं मातृभूमेरद्यतनी दुःस्थितिरपगमिष्यतीति दृढतया घोषयितुं शक्यते। आत्मनिरीक्षणद्वारा प्राप्तविवेकप्रकाशेनाऽऽत्मदोषसंशोधनम्, जितेन्द्रियतया सेवया भगवच्चिन्तया सत्यानुसंधित्सयाऽऽत्मत्वनिर्माणम्, परहितसाधन-रूपाध्यात्मभावनया वसुधैव कुटुम्बकचिन्तापरतया च पारस्परिकस्नेहसंप्रीतिवितरणम्, व्यर्थचिन्तनत्यागेन वार्त्तमानिककालस्य सदुपयोजनम्-इत्यादिप्रकारैराधुनिकसन्दर्भे प्राचीनव्रतसिद्धान्तस्य कार्यान्वयनमेव यथार्थदृष्टिरिति शम्।

## सन्दर्भाः

1. द्र. शंकराचार्यः स्वामी चिन्मयानन्दसरस्वती, "व्रतोद्देश्य, व्रत-रक्षा और व्रतप्रकार", कल्याण (हिन्दी भाषायाम्), 78तमो व्रतपर्वोत्सवभागः, गीताप्रेस, गोरखपुरम् 2003,पृ.89

2. पूर्वत्रोद्धृतम् (पू.)

3. द्र. शंकराचार्यः स्वामी निश्चलानन्दसरस्वती, "व्रतमीमांसा", पूर्वोद्धृत कल्याण,पृ.85

4. द्र. छान्दोग्योपनिषद्गतानां तेषां मन्त्राणां विनोबाभावेमहोदयकृतविचारः, कल्याण, (पू.) पृ.74

5. निरुक्तम् 2.4.13

6. श्रीमद्भागवतम्, गीताप्रेस, गोरखपुरम् 11.23.46

7. श्रीमद्भगवद्गीता 5.21

8. द्र, रामशरण दासः, "व्रत एव उपवास इत्यादि", कल्याण, (पू.) पृ.75

9. द्र. श्रीमद्भगवद्गीता, षोडशोऽध्यायः 1-3

**अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः।**
**दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम्।।**
**अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम्।**
**दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम्।।**
**तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता।**
**भवन्ति सम्पदं दैवीमजिभातस्य भारत।।**

10. द्र. **"निजवर्णाश्रमाचारनिरतः शुद्धमानसः।**
**अलुब्धः सत्यवादी च सर्वभूतहिते रतः।।**
**व्रतेष्वधिकृतो राजन्नन्यथा विफलः श्रमः।**
**श्रद्धावान्पापभीरुश्च मददम्भविवर्जितः।।**
**पूर्वं निश्चयमाश्रित्य यथावत्कर्मकारकः।**
**अवेदन्तिको धीमानधिकारी व्रतादिषु।।"** कल्याण (पू.), पृ.124

11. हेमाद्रिव्रतखण्डस्थमिति कल्याणे (पू.) उद्धृतम्, पृ.154

12. कल्याण (पू.), तत्रैव

13. पूर्वत्र

14. तत्रैव पृ.124

15. कल्याण, (पू.) पृ.38 **अष्टा तान्यव्रतघ्नानि आपो मूलं फलं पयः।**
**हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधम्।।**
अग्निपुराणम्, 175-43

16. द्र. कठोपनिषद्, श्रीरामशर्मसंपादिता, 108 उपनिषद् : ज्ञानखण्ड, संस्कृति संस्थान, बरेली, 1993, 1.3.3-10

17. विशेषो द्रष्टव्यः कल्याण, पूर्वोल्लिखितम् पृ.16-21



# अवतारमीमांसा

**डॉ. सीमा**

अवतरणम् अवतारः (अव + तृ + घञ्)। कस्य अवतरणं, कुत्र अवतरणं, कस्मादवतरणं, कथमवतरणमिति प्रश्नचतुष्टयं विचारणीयम्। सृष्टेः पूर्वदशायां केवलं निर्गुणं निर्विकल्पं निर्विशेषमेकमद्वितीयं ब्रह्मैवासीद्यथा छान्दोग्योपनिषदि (6.2.1) स्फुटीकृतम् - **"सदेव सोम्येदमग्र आसीत्।"** तैत्तिरीयोपनिषदि (2.6.4) इदमेव तथ्यमुपबृंहितमेवम्-**"सोऽकामयत्। बहु स्यां प्रजायेयेति। स तपोऽतप्यत्। स तपस्तप्त्वा इदं सर्वमसृजत यदिदं किञ्च। तत् सृष्ट्वा तदेवानुप्राविशत् इति।"**

पूर्वोक्तवेदवाक्येन तथ्यमिदं स्पष्टं भवति यत् ब्रह्मणः अव्यक्तरूपाद् व्यक्तरूपे प्राकट्यम् अवतरणं तदेव अवतारः। निर्गुणनिराकाररूपस्य ब्रह्मणः सगुणसाकार-रूपेण प्रादुर्भावो मर्त्यलोके भवति। इदमवतरणं दिव्यलोकाद् वैकुण्ठादिलोकादेव अस्यां पृथिव्यामेव भवति।

अवतारस्येयं परिभाषा वेदान्तरत्नमञ्जूषायामतिललिता वरीवर्ति-**"अवतारो नाम स्वेच्छया धर्मसंस्थापनार्थमधर्मोपशमनार्थं स्वीयानां वाञ्छापूर्त्यर्थं च विविधविग्रहैराविर्भावविशेषः।"**

अनया परिभाषया अवतारस्य स्वरूपं च प्रयोजनं चापि परिलक्ष्येते। परमात्मनः स्वकीया इच्छा तस्य अवतारस्य कारणं न तु काचिद् विवशता। अवतारस्य प्रयोजनं धर्मस्य स्थापनम् अधर्मस्य उपशमनं च। स्वीयानां भगवद्भक्तानां वाञ्छापूर्तिरपि अवतारहेतुर्भवति।

कस्मिन् रूपे भगवतः प्रादुर्भावो भवति इत्यस्य प्रश्नस्यापि समाधानं परिभाषा स्फुटं ददाति- **"विविधविग्रहैराविर्भावः"** इत्युक्त्वा महापुराणेन भागवतेन भगवतो विविधविग्रहैः प्रादुर्भावस्य स्पष्टं समर्थनं क्रियते निम्नश्लोके-

**अवतारा ह्यसंख्येया हरेः सत्त्वनिधेर्द्विजाः।**
**यथाविदासिनः कुल्याः सरसः स्युः सहस्रशः।।**(श्रीमद्भागवतम्-1.3.26)

यथा ह्यगाधसरोवरात् सहस्रशः कुल्याः प्रभवन्ति तथैव भगवतोऽसंख्येया अवताराः भवन्ति भविष्यन्ति च। गर्गाचार्यः स्वकीयायां गर्गसंहितायां षड्विधानवतारान् प्रतिपादयति स्म–

**अंशांशोंऽशस्तथावेशः कलापूर्णः प्रकथ्यते।**

**व्यासाद्यैश्च स्मृतः षष्ठः परिपूर्णतमः स्वयम्।।**(श्रीगर्गसंहिता-1.16)

एतदनुसारेण षड्विधाः अवतारा हरेर्भवन्ति–(i) अंशांशः (ii) अंशः (iii) आवेशः (iv) कला (v) पूर्णः (vi) परिपूर्णतमश्च।

महर्षिमरीचिः अंशांशावतारः मन्यते। ब्रह्मादिदेवशिरोमणिरंशावतारः कथ्यते। श्रीपरशुरामो मन्यते आवेशावतारः। कपिलः कूर्मादयश्च कलावताराः सन्ति। श्रीनृसिंहः श्वेतद्वीपाधिपतिर्हरिः नरनारायणादयः पूर्णावताराः कथ्यन्ते। श्रीकृष्णस्तु परिपूर्णतमोऽवतारः। केचिन्मनीषिणो राममपि परिपूर्णतमावताररूपेण गृह्णन्ति।

पुराणेषु चतुर्विंशतिः अवतारा वर्णिताः सन्ति।

सनकसनन्दनसनत्कुमारसनातनेति चतुःसनः (**आदौ सनात् स्वतपसः स चतुःसनोऽभूत्** (भाग. - 2.7.5) आद्योऽवतारः। अयं प्रथमावतारः ब्रह्मचर्यस्य प्रतीकरूपः। सर्वेषु धर्मेषु ब्रह्मचर्यस्य महत्त्वं वरीवर्ति। वराहावतारो द्वितीयो यः संतोषस्य प्रतीकोऽस्ति। तृतीयावतारो नारदो भगवद्भक्तेः प्रतीकः। नरनारायणरूपेण चतुर्थावतारेण तपोरूपधर्मस्य प्रतिष्ठा शिक्ष्यते। ज्ञानवैराग्यस्वरूपः कपिलः पञ्चमावतारोऽस्ति। सद्गुरुस्वरूपप्रतिष्ठार्थं भगवतः षष्ठावतारो दत्तात्रेयः। सप्तमावतारो यज्ञोऽस्ति। धर्मस्य प्रसारोऽस्य प्रयोजनम्। ऋषभदेवो भगवतोऽष्टमोऽवतारः। मोक्षमार्गस्य शिक्षणमस्य प्रयोजनम्। नवमोऽवतारः पृथुरासीत् यस्य नाम्ना अस्मदीया भूमिः पृथ्वी कथ्यते। दशमोऽवतारो मत्स्यनारायणो येन वैवस्वतो मनुः सप्तर्षयश्च दिव्यलोकमङ्गलप्रदोपदेशं प्राप्तवन्तः। अमृतप्राप्त्यर्थम् एकादशोऽवतारः कूर्मः। धन्वन्तरिर्द्वादशोऽवतारो यस्य पूजा आरोग्यदेवरूपेण क्रियते। त्रयोदशावताररूपेण मोहिनी प्रादुर्भूता यया समग्रा सृष्टिर्मायापतेर्भगवतो मायारूपेति स्थापिता तथा चासुरभावेनामृतं नैव लभ्यमिति ख्यापितम्। नरसिंहश्चतुर्दशोऽवतारो येन हिरण्यकशिपुः पञ्चत्वं प्राप्तवान् भक्तप्रह्लादश्च भगवतः कारुण्यं लेभे। वामनः पञ्चदशोऽवतारो यः पूर्णरूपेण निष्कामो यस्य शिरसि च भक्तेर्नीतेश्च छत्रं दरीदृश्यते। हयग्रीवः षोडशोऽवतारो येन दैत्येभ्यो वेदाः समुद्धृताः।



सप्तदशावताररूपेण हरिराविर्भूतो येन गजेन्द्रस्य ग्राहादुद्धारः कृतः। अष्टादशावताररूपेण परशुरामः प्रादुर्बभूव। अयमावेशावतारः कथ्यते। अनेन दुष्टा राजानः कालं वशीकृताः पृथ्वी च पापाचाराधर्मान्यायेभ्यो मुक्ता कृता। एकोनविंशतितमावतारो व्यासोऽभूत्। व्यासो भगवतः कलावतारः कथ्यते। व्यासः ज्ञानस्य, धर्मस्य, कारुण्यस्य तपसश्च मूर्तिरेवासीत्। हंसो विंशोऽवतारः। सनत्कुमारदीन् मुनीन् भगवान् हंसरूपेण ज्ञानमार्गमात्मतत्त्वञ्चोपदिदेश। मर्यादापुरुषोत्तमो रामो ह्येकविंशतितमोऽवतारः। लीलापुरुषोत्तमः कृष्णो द्वाविंशतितमोऽवतारः। बुद्धश्च त्रयोविंशतितमोऽवतारः। कल्किश्च चतुर्विंशतितमावताररूपेण कलियुगस्य समाप्तौ प्रादुर्भविष्यतीति पुराणस्य मान्यता।

एतेषामवताराणां मध्ये दशावताराः प्रसिद्धिमवाप्तवन्तः यथा श्लोकेऽस्मिन् निरूपितम्–

**मत्स्यः कूर्मो वराहश्च नरसिंहोऽथ वामनः।**

**रामो रामश्च कृष्णश्च बुद्धः कल्किश्च ते दश।।**

एतेषां मध्येऽपि रामस्य कृष्णस्य च महत्त्वमनन्तमेव। अवतारवादस्य समर्थनं वेदेषु बहुलांशेन लभ्यते। एते अवतारसिद्धान्तस्य बोधकाः कतिपयमन्त्रा अवलोकनीयाः-

**प्रजापतिश्चरति गर्भे अन्तरजायमानो बहुधा विजायते।**

**तस्य योनिं परिपश्यन्ति धीरास्तस्मिन् ह तस्थुर्भुवनानि विश्वा।।**

(यजु. माध्य.सं - 31.194 अथर्व. 10.8.13)

अयं मन्त्रस्यास्यार्थोऽस्ति यत् प्रजापालकः जगदीश्वरः सर्वेषां जन्तूनां मध्ये (अन्तः) विचरति (चरति)। गर्भे अजायमानः सन् बहुप्रकारेण (बहुधा) विजायते (रामकृष्णादिरूपैः)। तस्य प्रजापतेः योनिं मूलब्रह्मस्वरूपं धीराः तत्त्वदर्शिन एव परिपश्यन्ति। तस्मिन् प्रजापतौ विश्वानि सर्वाणि भुवनानि तस्थुः समवस्थिताः सन्ति।

श्रीमद्भगवद्गीतायाः श्लोकेऽस्मिन् अयं भावः परिलक्ष्यते –

**अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन्।**

**प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया।।** (गीता, 4.6)

मत्स्यावतारस्य कथा मनुमत्स्यकथारूपेण शतपथब्राह्मणे (1.8.1) विद्यते। एवं च कूर्मावतारस्य तैत्तिरीय आरण्यके (1.23.3) "**अन्तरतः कूर्मभूतः**" इत्यादिना चर्चा संप्राप्यते।

**वराहेण पृथिवी संविदाना सूकराय विजीहते मृगाय।** (अथर्व. 12.1.48) इत्यादिना वराहावतारस्य संकेतः प्राप्यते।

नृसिंहावतारस्य चर्चा ऋग्वेदे **"मृगा न भीमः कुचरो गरिष्ठः"** इत्यनया ऋचा लभ्यते। **"इदं विष्णुर्विचक्रमे त्रेधा निदधे पद"** मित्यनया ऋचा ऋग्वेदे (1.22.17) वामनावतारस्य मीमांसा विद्यते।

**"इदं मे ब्रह्म च क्षत्रं चोभे श्रियमश्नुताम्"** (यजुः-32.16) इत्येषोक्तिः परशुरामावतारस्य संकेतं ददातीति मन्यन्ते विद्वांसः।

रामावतारस्य तु संकेतः प्रभूतेन प्राप्यते ऋग्वेदे (**"सीते वन्दामहे त्वा"**-4.57.6), अथर्ववेदे (**"रामे कृष्णे"**-1.23.1 तथा च **"अष्टचक्रा नवद्वारा देवानां पूरयोध्या"** (10.2.31) च।

कृष्णावतारस्य चर्चा ऋग्वेदे अथर्ववेदेऽपि छान्दोग्योपनिषदि तैत्तिरीय आरण्यके च लभ्यते। ऋग्वेदस्य प्रमाणमग्रे लिख्यते - **"कृष्णं नियानं हरय सुपर्णा"** (1.164.47), **"कृष्णं ते"** (4.7.9) इत्यादयः। अथर्ववेदस्य **"रामे कृष्णे"** (1.23.1) छान्दोग्योपनिषदः **"तद्धैतद्घोर आङ्गिरसः कृष्णाय देवकीपुत्राय"** (छान्दो. - 3.17.6) तथा च तैत्तिरीयारण्यकस्य **"वासुदेवाय धीमहि"** (10.1.6) इत्यादीनि प्रमाणानि सन्ति।

अवतारस्य विशदं वर्णनं श्रीमद्भगवद्गीतायां लभ्यते। भगवत्पादशङ्कराचार्य-महोदयेन स्वकीये गीताभाष्ये भगवतोऽवतारस्य प्रागवस्था च प्रयोजनं च सम्यग् रूपेण विशदीकृते–**"दीर्घेण कालेन अनुष्ठातॄणां कामोद्भवाद् हीयमान-विवेकविज्ञानहेतुकेन अधर्मेण अभिभूयमाने धर्मे प्रवर्धमाने च अधर्मे जगतः स्थितिं परिपालयिषुः स आदिकर्ता नारायणाख्यो विष्णुः भौमस्य ब्रह्मणो ब्राह्मत्वस्य रक्षणार्थं देवक्यां वसुदेवाद् अंशेन कृष्णः किल संबभूव।"**

अयमेव भावः कृष्णेन गीतायां स्फुटमभिव्यनक्ति –

**यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।**
**अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्।।** (गीता-4/7)

इत्यनेन स्पष्टं यत् धर्मे अधर्मेण अभिभूयमाने अधर्मे प्रवर्धमाने सति धर्मस्य संरक्षणार्थं साधुचरितानां परित्राणाय दुष्टकर्मणां विनाशाय च भगवान् पृथिव्यामवतरति। एतस्माद्धेतोः अवतारशब्दस्य अपरश्चेत्यर्थः संभवति। अवतीति अवः, तारयतीति तारः, अव एव तारः अवतारः। अवति भक्तांस्तारयति पतितांश्चेति अवतारः।



दुष्टदलनं शिष्टमण्डनमित्यादि भावं मनसि निधाय भगवान् स्वयं प्रादुर्भवति जीवानुग्रहहेतुना यथा च भागवते महापुराणे ब्रह्मणा कथितमस्ति –

**सुरेष्वृषिष्वीश तथैव नृष्वपि**
**तिर्यक्षु यादस्स्वपि तेऽजनस्य।**
**जन्मासतां दुर्मदनिग्रहाय**
**प्रभो विधातः सदनुग्रहाय च।।** (भागवत-10.14.20)

हे प्रभो! त्वं सर्वस्य जगतः स्वामी विधाता चासि। अजन्मा सन् त्वं देवेषु, ऋषिषु, मनुष्येषु, पशुपक्षिरूपेषु, जलचरादियोनिषु प्रादुर्भवसि असतां दुर्मददमनाय सतां चानुग्रहाय।

अस्मिन् सन्दर्भे एकोऽन्यः प्रश्नो विचारणीयोऽस्ति। द्वादशकलासम्पन्नो रामस्तथा षोडशकलासम्पन्नः कृष्णश्च परिपूर्णतमावतारौ इत्यस्य कोऽर्थः?

का नाम कलेति प्रथमं विजिज्ञासितव्यः ब्रह्मणोऽभिव्यञ्जकतत्त्वस्य नाम कलेति। प्रश्नोपनिषदि **"षोडशकलं पुरुषं वेत्थ"** इति (6.1.4) तथा च जैमिन्युपनिषदि (3.28.8) **"षोडशकलं वै ब्रह्म"** इति द्वौ मन्त्रौ ब्रह्मणः कलायाश्चर्चां कुर्वाते। अतः कलायाः स्वरूपं विशदीकरणीयम्।

परिपूर्णतमावतारः कृष्णः षोडशकलासम्पन्नो मन्यते। रामस्तु द्वादशकलासम्पन्नोऽपि परिपूर्णतमावतारः। कृष्णश्चन्द्रवंशसमुत्पन्नः। चन्द्रस्य षोडश कलाः सन्ति - अमृता, मानदा, पूषा, तुष्टिः, पुष्टिः रतिः, धृतिः, शशिनी, चन्द्रिका, कान्तिः, ज्योत्स्ना, श्रीः, प्रीतिः, अङ्गदा, पूर्णा, पूर्णामृता च।

रामः सूर्यवंशावतंसोऽभूत्। सूर्यस्य द्वादश कलाः सन्ति। ताश्च सत्त्वं रजस्तमः महत्, अहम्, पञ्च भूतानि, मनश्चेन्द्रियाणि च। रामकृष्णयोः कलामूलकोऽयं भेदः।

इदं संक्षेपेण कथयितव्यं यत् कालो यस्य दिव्यत्वं स्वीकरोति, यस्य गुरुत्वस्य समक्षं लोका नतमस्तका भवन्ति, यस्य करुणा, जीवानुग्रहादिगुणाः अपरिमिताः सन्ति तमेव लोका अवताररूपेण गृह्णन्ति।

अयं निबन्धः स्कन्दपुराणस्य निम्नश्लोकेन परिसमाप्यते–

**"अवतारा भगवतो भूता भव्याश्च सन्ति ये।**
**कर्तुं न शक्यते तेषां संख्या सांख्यविशारदैः।।"**

# किञ्चित् पारिभाषिकम्

काशिकावृत्तौ अष्टाध्यायीगतानां सूत्राणां शब्दाः यथा परिभाषिताः तथा सूत्र–तत्संख्योल्लेखपुरःसरम् अध्यायक्रमेणात्र संगृह्यन्ते।
अ0 = अष्टाध्यायी। वा0 = वार्तिकम्

| | | |
|---|---|---|
| आभीक्ष्ण्यम् | आभीक्ष्ण्यं पौनःपुन्यम्। का. बहुलमाभीक्ष्ण्ये | 3.2.81 |
| | तात्पर्यम् आसेवा, ताच्छील्याद् अन्यत्। | का.3.2.81 |
| आत्ममानः | आत्मनो मननम् आत्ममानः। | |
| | का. आत्ममाने खश्च | 3.2.83 |
| अभिज्ञा | अभिज्ञा स्मृतिः। | |
| | का.अभिज्ञावचने लृट् | 3.2.112 |
| आकाङ्क्षा | लक्ष्यलक्षणयोः सम्बन्धे प्रयोक्तुराकाङ्क्षा भवति। (अभिजानासि देवदत्त? यत् कश्मीरेषु अवसाम, यत्र त ओदनम् अभुज्महि? वासः लक्षणम्, भोजनं लक्ष्यम्।) | |
| | का. विभाषा साकाङ्क्षे | 3.2.114 |
| प्रश्नः | प्रष्टव्यः प्रश्नः। | |
| | का. प्रश्ने चासन्नकाले | 3.2.117 |
| वर्त्तमानः | आरब्धः अपरिसमाप्तश्च वर्त्तमानः। | |
| | का. वर्त्तमाने लट् | 3.2.123 |
| लक्षणम् | लक्ष्यते चिह्न्यते येन तत् लक्षणम्। | |
| हेतुः | जनकः (धात्वर्थविशेषणं चैतत्)। | |
| | का. लक्षणहेत्वोः क्रियायाः | 3.2.126 |
| ताच्छील्यम् | ताच्छील्यं तत्स्वभावता। | |
| वयः | वयः शरीरावस्था। | |
| शक्तिः | शक्तिः सामर्थ्यम्। | |
| | का. ताच्छील्यवयोवचनशक्तिषु चानश् | 3.2.129 |
| अकृच्छ्रः | अकृच्छ्रः सुखसाध्यः। | |
| | का.इङ्धार्योः शत्रकृच्छ्रिणि | 3.2.130 |



# काव्यानां निहिता अभिप्रायाः

डॉ. सदाशिवकुमारद्विवेदी

अभिप्रेतार्थस्य अभिव्यञ्जनाय लौकिकाः शब्दाः दोषराहित्येन गुणान्वितत्वेन च कथं प्रयोक्तव्या इति उपदिशन्ति साहित्यतत्त्वविदः आचार्याः कवयश्च लोकम्। शब्दौचित्यान्वितत्वेन सह अभिप्रेतार्थाभिधायकत्वं साहित्यशास्त्रग्रन्थेषु सर्वत्रैवोपलभ्यते विस्तरेण। अत एवोच्यते आचार्यैः साहित्यतत्त्वविद्भिः साहित्यं नाम लौकिकं मीमांसाशास्त्रम् इति।

शब्दप्रयोगे उपयुक्तत्वम्, अभिप्रेतार्थाभिधायकत्वम्, अर्थसंगतिः, विशेषणगतान्यौचित्यानि इत्येतानि वैशिष्ट्यानि लौकिकवाक्यप्रयोगे साहित्यशास्त्रानुसन्धानधियैव सम्भवन्ति, तेन च सम्भवति महाकवित्वलाभः लोकेऽस्मिन्। महाकवीनां काव्यग्रन्थेषु अभिप्रेतार्थसम्प्रेषणविषयिणी शब्दसरणिः अनुस्रियमाणा दृश्यते कविभिः प्रायेण सर्वत्रैव। सामर्थ्यमेतदेवास्ति निर्धारकं तेषां महाकवित्वस्य। प्रमाणीभवत्येतद् आचार्यस्य आनन्दवर्द्धनस्य वचनैरित्थम्–

**सोऽर्थस्तद्व्यक्तिसामर्थ्ययोगी शब्दश्च कश्चन।**
**यत्नतः प्रत्यभिज्ञेयौ तौ शब्दार्थौ महाकवेः।।**[1]

अभिप्रेतार्थव्यञ्जकत्वस्य सामर्थ्यं महाकवीनां वाणीषु सुप्रतिष्ठितं स्यादिति साहित्यतत्त्वानां प्रतिपादने कृतभूरिपरिश्रमाणामस्ति प्रायेण समेषामेव साहित्यशास्त्रस्य आचार्याणां प्रधानभूतं लक्ष्यम्। शब्दार्थयोः परिज्ञानेन सह अपेक्ष्यते अपूर्वायाः कस्या अपि प्रतिभायाः शक्तिपदाभिधेयायाः अनितरसाधारणः अन्वयः कविकर्मणि। सा चैषा प्रतिभा कविकर्मणि प्रवृत्तानां विदुषाम् अनतिनियमबद्धा स्वतन्त्रा च भवति प्रायेण सर्वत्र। लोकेऽस्मिन् सर्वेऽपि पदार्थाः परिच्छिन्नाः सन्ति। न परित्यजन्ति ते स्वकीयं कमपि स्वभावं विधात्रा निर्धारितम्। नोपलभ्यते तेषु स्वातन्त्र्यं तथा, यथा कविप्रतिभायाम्। महाकविः राजशेखरः समुद्घोषयत्येतद् दृष्ट्वा सम्पूर्णमपि चराचरात्मकं जगत् परिमितं नियतपथावलम्बिनञ्च केनापि अनितरसाधारणसामर्थ्यान्वितेन वेधसा विधिना विनिर्मितमपि एवम्–

**उदयन्वच्छन्ना भूः स च निधिरपां योजनशतं**

**सदा पान्थः पूषा गगनपरिमाणं गणयति।**

**इति प्रायो भावाः स्फुरदवधिमुद्रामुकुलिताः**

**सतां प्रज्ञोन्मेषः पुनरयमसीमा विजयते।।[2]**

सम्पूर्णाऽप्येषा वसुमती परिच्छिन्नैव जलनिधिना प्रवर्तमाना संदृश्यते सर्वभूतसंपोषणकर्मणि। जलनिधिरप्येष वसुमतीं परिच्छिन्दन्नपि नोल्लंघयते कथमप्यान्मनः परिधिं सन्निहितत्वेनात्रैव तस्य गभीरतायाः। सूर्योप्येष प्रतिदिवसम् एकत्रैवावस्थितः स्वकीयं निर्धारितं परिधिं चावलम्ब्य परिगणयति गगनपरिमाणम्। अत एव चराचरात्मकस्यास्य जगतः सर्वेऽपि पदार्थाः उपलक्ष्यन्ते परिसीमितसामर्थ्यसंपन्ना असमर्थाश्च विधिना निर्मितां प्रकृतिमुल्लङ्घ्य प्रवर्तयितुमात्मानम् ऋते कविप्रतिभायाः। कविप्रतिभायामस्यामरिच्छिन्नमस्ति प्रतिष्ठितं किमपि सामर्थ्यं येनानुप्राणिता एषा प्रवर्तमाना दृश्यते निर्माणे अपूर्वस्यैव जगतः। तच्चैतत् जगत् भिन्नमेव सर्वथा रमणीयतामेवावहति चेतःसु तत्र रममाणेषु सहृदयानां काव्यतत्त्वरसिकानाम्। कवीनामेतत् प्रातिभमेव चक्षुः जनयति सामर्थ्यं शब्दार्थरूपिणि साहित्ये तेषामभिप्रेतार्थव्यञ्जकत्वरूपिणमनितरसाधारणम्। एतदेवास्ति वैशिष्ट्यं साहित्यशास्त्रतत्त्वेषु अनुरक्तानां कविप्रतिभान्वितानां विदुषाम्।

प्रमाणीभवत्येतद् यथार्थमनुशीलनेन महाकवित्वं भजमानानां कवीनां काव्यानां यत्रोपलभ्यते प्रतिपदमभिप्रेतार्थगर्भितपदप्रयोगसरणिः। रघुवंशमहाकाव्यस्य द्वितीयसर्गे उपनिबद्धोऽस्ति महाकविना रुद्रकेसरिणा सह सूर्यवंशोद्भवस्य राज्ञः दिलीपस्य अपूर्वः कोऽपि संवादः कर्तव्यकर्मणि समर्पणविषयकः। देवसुरभिपुत्र्या नन्दिन्याः सेवायां महर्षिणा नियोजितः राजा मायासिंहेन आक्रान्तां नन्दिनीमवेक्ष्य सिंहं हन्तुं यदा यतते तदा शरसन्धानाय कृतोद्योगं राजानं स्वप्रभावेण असमर्थं विधाय सिंहः राजानं सम्बोध्य कथयत्येवम्–

**अलं महीपाल! तव श्रमेण प्रयुक्तमप्यस्त्रमितो वृथा स्यात्।**

**न पादपोन्मूलनशक्ति रंहः शिलोच्चये मूर्च्छति मारुतस्य।।[3]**

सिंहेन शरसन्धानाय प्रतिष्टम्भितशक्तौ अत्यन्तं दैन्यान्विते राजनि 'महीपाल' इति विशेषणस्यात्र प्रयोगः अभिव्यञ्जयति कवेर्विशिष्टाभिप्रायप्रकाशिकां शक्तिम्। महीपालत्वं नाम सकलपृथ्वीपरिरक्षणक्षमपौरुषान्वितत्वं राज्ञः दिलीपस्य चक्रवर्तिनः। तथाविधमासर्थ्यसम्पन्ने राजनि गुरुगोरूपस्य अत्यल्पजीवमात्रस्य परिरक्षणसामर्थ्यं



नास्ति इत्येवार्थजातमत्र अभिव्यञ्जयति कविः दैन्यान्वितं राजानमभिलक्ष्य।

पुनरप्यत्रैव परिहसति सिंहः सामर्थ्यं दिलीपस्य प्रसङ्गेऽस्मिन्नेव एवम्–

**भूतानुकम्पा तव चेदियं गौरेका भवेत् स्वस्तिमती त्वदन्ते।**

**जीवन् पुनः शश्वदुपप्लवेभ्यः प्रजाः प्रजानाथ पितेव पासि।।[4]**

गोरक्षणार्थं राज्ञा क्रियमाणः प्राणत्यागः लाभाय न भविष्यति लोकस्य। प्राणत्यागेन राज्ञः एकाकिनी गौरेव स्वस्तिमती भविष्यति न पुनः सम्पूर्णाः प्रजाः तदधीना विरहपर्युत्सुकीभूताः। अत एव एकामबलां गामेव संरक्षितुं राज्ञा क्रियमाणः प्राणत्यागः अत्यन्तं हानिकरो भविष्यति समेषामेव लौकिकानां जनानां कृते। अत्र सिंहः परिहसति प्रजानाथत्वं राज्ञः। गुरुहोमधेनोः परिरक्षणे अत्यन्तं दैन्यान्वितस्य राज्ञः प्रजानाथत्वं समेषामेव तदधीनानां परिहासाय एव। यः गां परिरक्षितुमसमर्थः, तेन कथं संभाव्यते प्रजापरिरक्षणं मनागपि इति प्रत्यक्षं प्रमाणीभवत्यत्रार्थविशेषं महाकवेरभिव्यञ्जयितुं परिगुम्फितायां विशिष्टायां शब्दयोजनायाम्।

अभिज्ञानशाकुन्तलस्य प्रथमाङ्के एव कविना केनापि वचनेन विशिष्टाभिप्रायगर्भितत्वेन राज्ञे चक्रवर्तिपुत्रलाभ उद्घोषितो वैखानसमुखेन एवम्–

**जन्म यस्य पुरोर्वंशे युक्तरूपमिदं तव।**

**पुत्रमेवंगुणोपेतं चक्रवर्तिनमाप्नुहि।।[5]**

दुष्यन्तः सत्यपि अवरोधजनाकुले स्वान्तःपुरे पुत्रहीन एव अवतिष्ठते इति सुविदितमेवासीत् कालिदासाय। कस्तावत् राज्यस्य धारयिष्यति धुरं तदनन्तरमिति प्रश्नः सर्वत्रैव सर्वानपि राज्ये बाधतेतरामहर्निशं राज्ञा सह। आशीर्वचोभिरेभिः वैखानसस्य समस्यायाः समाधानं सञ्जातमुत्तराधिकारविषयिण्याः।

नाटकस्यास्य प्रारम्भे एव आशीर्वादप्रदानेन राज्ञे न केवलं निर्मूलीकृताऽस्ति कविना सन्तानविषयिणी समस्या, संकेतितोऽप्यस्ति दुष्यन्तस्य कयापि ऋषिकन्यकया उपयमः सवर्णक्षेत्रसम्भवया तेन च प्राप्तिः पुत्ररत्नस्य अपरिहार्यत्वेन। इदमेवास्ति नाटकस्यास्य प्रधानभूतं फलं यत् कविना उपनिबद्धमत्र पद्यरत्नेऽस्मिन् विशिष्टाभिप्रायगर्भितत्वेन। नाटकस्यास्य प्रमाणीभवत्यत्र समाधानगर्भितत्वं यतोहि आसीद् राज्ञः सन्तानहीनत्वं कष्टप्रदं सम्पूर्णस्य राष्ट्रस्य कृते। दुष्यन्तस्य चक्रवर्तिपुत्रलाभेन नायकस्य प्राप्तिर्भवति राष्ट्राय इति तु निश्चप्रचमेव। एतत्सर्वमपि अर्थजातं महते संतोषाय प्रजानां वृत्तान्तेऽस्मिन्नुपनिबद्धं महाकविना अत्यन्तं लालित्यपूर्णे।

उत्तररामचरिते महाकविना भगवत्याः जनकनन्दिन्याः परित्यागस्य कथानकमस्ति प्राधान्येन परिगुम्फितम्। नाटकस्यास्य परिणतिः, सत्यपि परित्यागकथायाः सीतायाः प्राधान्ये, सुखान्विता एवास्ति वाल्मीकितपोवने। सीतायाः परित्यागः राममुखेन कविना वारद्वयं संसूचितोऽस्ति प्रथमाङ्के नाटकस्यास्य। प्रथमं यत्र प्रकाशयति रामः प्रजानुरञ्जनविषयकं स्वकीयमद्वितीयमेव समर्पणं पद्येऽस्मिन्–

**स्नेहं दयां च सौख्यं च यदि वा जानकीमपि।**
**आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा।।**[6]

अत्र रामः समाश्वासयति मैत्रावरुणिं प्रजानुरञ्जनविषये यतो हि भवन्ति राजानः सूर्यवंशीयाः यशःप्रियाः प्राधान्येन। परिरक्षणाय यशसः उद्युक्ता भवन्ति सर्वमपि वैयक्तिकमपि वस्तुजातं परित्यक्तुं प्राप्तेऽवसरे। तेषां कृते यदत्यन्तं वैयक्तिकमपि अस्ति दारपरित्यागरूपं तदपि तुच्छमेवावतिष्ठते प्रजापालनकर्मणि तत्पराणां याथार्थ्येन। अत एव जानकीपरित्यागोप्यन्यन्तं लघ्वर्थक एव रामाय एवमुद्घोषयितुं प्रवृत्ताय। पद्येनानेन कविना संसूच्यते यदस्ति आसन्न एव सीतापरित्यागजनितः वियोगः रामस्य। राजधर्मानुष्ठानव्रतेनानुप्राणिता वाणी यदुद्घोषयति तत्सत्यं भविता इति नोपलक्ष्यते कथाप्रसङ्गेऽत्र कथमपि। एतदेवाऽस्ति सत्यं यत्प्रमाणीभवति प्रच्छन्नन्वेन राज्ञा क्रियमाणेन सीतापरित्यागेन। अनेनाभवत् राष्ट्रस्य हितमानुषङ्गिकत्वेन अत्यन्तं लाभेन राष्ट्र-श्रीसंवर्धनाय समर्थानां योग्याधिकारिणामुत्तरवर्त्तिनां लब्धविद्यानामाश्रमे महर्षेः।

पताकास्थानकमुखेन अङ्केऽस्मिन् पुनरपि संकेतयति कविः आसन्नं सीतापरित्याग-रूपिणं शल्यभूतं वृत्तान्तम्। चित्रफलकत्वेन सम्पूर्णं वनवासस्य कथानकमुपस्थाय वज्रभूताया आलर्कं विषमिव प्रसृतायाः लोकापवादविषयिण्याः वाण्याः प्रकाशनात् पूर्वं रामः निद्रितामासन्नप्रसवां भवगतीं सीतां संबोध्य कथयत्येवम्–

**इयं गेहे लक्ष्मीरियममृतवर्तिर्नयनयो-**
**रसावस्याः स्पर्शो वपुषि बहुलश्चन्दनरसः।**
**अयं बाहुः कण्ठे शिशिरमसृणो मौक्तिकसरः**
**किमस्या न प्रेयो यदि परमसह्यस्तु विरहः।।**[7]

अत्रोपलक्ष्यते रामस्य अनन्यभूतोऽनुरागः सीताविषयकः। अत्र रामः सीतां साक्षाल्लक्ष्मीं मनुते नयनानन्दकारिणीं यस्याः स्पर्शः एतस्मै प्रतिभाति चन्दनवत् शीतलः। रामस्य कण्ठे निमग्नौ बाहू मौक्तिकसर इव वर्तेते सीतायाः। ऋते विरहात् सर्वमपि एतत्सम्बन्धि वस्तुजातं प्रियमत्यन्तं रामाय।



रामस्य वचनमेतदनु सहसैव वदति प्रतीहारी प्रत्यक्षम् उपस्थाय **"देव उपस्थित"** इति। वचनमेतत् प्रतीहारिणः संसूचकमेवास्ति सीतापरित्यागविषयकस्य भाविवृत्तान्तस्य। अचिरं सीतापरित्यागो भविष्यतीति अव्यक्तार्थमेतदस्ति वस्तु वचनेऽस्मिन्। वस्तुतस्तु उपस्थित एवास्ति द्वारे दुर्मुखः आसन्नपरिचारकः रामस्य रामाय निवेदयितुं जनापवादं विदेहजाविषयकम्। अमुमेवाधिकृत्य सम्पत्स्यते परित्यागः सीतायाः उत्पत्तिपरिपूतायाः। पद्यद्वयमेतत् कवेरस्य व्यञ्जयितुमत्र उपनिबद्धं विशिष्टं जनकनन्दिन्याः निर्वासनविषयकम् अभिप्रायं प्रथमे अङ्केऽस्मिन्।

कविरत्र अत्यन्तं जागरूक एवास्ति। सीतापरित्यागेन रामस्य दाम्पत्यानुष्ठान-विषयिणी काऽपि शङ्का प्रजाजनेषु प्रसृता न स्यादित्येवाभिप्रेत्य कविः राममुखेनैव दाम्पत्यस्य महत्त्वं प्रतिपादयत्येवमत्र सद्य एव–

**अद्वैतं सुखदुःखयोरनुगतं सर्वास्वस्थासु यत्**
**विश्रामो हृदयस्य यत्र जरसा यस्मिन्नहार्यो रसः।**
**कालेनावरणात्ययात्परिणते यत्प्रेमसारे स्थितं**
**भद्रं तस्य सुमानुषस्य कथमप्येकं हि तत्प्रार्थ्यते।।**[8]

पद्येऽस्मिन् उपलभ्यन्ते दाम्पत्ये स्थैर्यस्य संस्थापकानि कान्यपूर्वाणि सूत्ररत्नानि कृते समेषां गार्हस्थ्यमुपभुञ्जानानां जनानाम्। पद्यमेतदस्ति संसूचकं भगवतो रामस्य दाम्पत्यविषयिण्याः अद्भुतायाः स्थिरभूतायाः भावनायाः। नानभिज्ञोऽस्ति रामः दाम्पत्य-मर्यादाविषये कथमपि। स जानात्येव आस्माकीनां परम्परां दाम्पत्यविषयिणीं समाजे अनुस्रियमाणामनन्यत्वेन सर्वैः। तत्कृतः परित्यागः जनकनन्दिन्याः रक्षणाय आसीद् राजधर्मस्य, न पुनः समूलोन्मूलनाय स्वकीयस्य गृहस्थधर्मस्य। राजपदवी-मारूढोप्यसावत्यन्तमास्थावानस्ति दाम्पत्यनियमेषु इति संसूच्य कविरत्र सीतापरित्याग-मुपक्रमते। रामस्य चरितमस्त्यत्र संरक्षितं कविना पद्येनानेन यतो हि रामः लोकमर्यादायां विश्वसिति दार्ढ्येन। असौ दैवदुर्विपाकजनितं लोकापवादं श्रुत्वा सीताविषयकं, गुरुभिः संदिष्टं लोकानुरञ्जनमेव मनुते प्रधानम्–

**सतां केनापि कार्येण लोकस्याराधनं परम्।**
**तत्प्रतीतं हि तातेन मां च प्राणांश्च मुञ्चता।।**[9]

उत्तररामचरितस्य अङ्केस्मिन् लोकानुरञ्जनाय कृतसंकल्पः सीताविरहस्य कल्पनामप्यसहमानश्च रामः अनभिज्ञ एवास्ति उभयत्रापि सीतापरित्यागस्य भाविवृत्तान्तेन

सर्वथा। साभिप्रायेण परिगुम्फितानि पद्यरत्नान्येतानि भगवतो रामस्य लोकमर्यादायाः संरक्षकत्वमनन्यत्वेन प्रमाणयन्ति राजमर्यादायाश्च। विशिष्टञ्चैतदभिप्रायमभिव्यञ्जयितुं महाकविना उपनिबद्धान्येतानि पद्यानि सन्ति प्रकाशकानि तन्निष्ठायाः अपूर्वार्थनिर्माण-क्षमायाः प्रतिभायाः सहृदयानां चेतसि चमत्कारातिशयं जनयितुं समर्थायाः।

सीतापरित्यागस्य सम्पूर्णोप्येष वृत्तान्तः रघुवंशे महाकविना कालिदासेन भिन्नत्वेनास्ति उपनिबद्धः भवभूतेः पूर्वम्। सीतापरित्यागाय रामः लक्ष्मणमादिशत्येवमत्र-

**प्रजावती दोहदशंसिनी ते तपोवनेषु स्पृहयालुरेव।**
**स त्वं रथी तद्व्यपदेशनेयां प्रापय्य वाल्मीकिपदं त्यजैनाम्।।**[10]

रामः सौमित्रिं संबोध्य आदिशति सीतापरित्यागाय "प्रापय्य वाल्मीकिपदं त्यजैनाम्" इति। लक्ष्मणेन सीतायाः परित्यागो विधेयः वाल्मीकेः आश्रमस्य समीपवर्तिनीं विधाय इति रामस्य आसीदभिप्रेतम्। लक्ष्मणोऽपि सीतायै सम्पूर्णमपि वृत्तान्तमाख्याय वाल्मीकेः आश्रमस्य मार्गं प्रदर्शयत्येवं रामाज्ञानुकारित्वात्–

**आश्वास्य रामावरजः सतीं तामाख्यातवाल्मीकिनिकेतमार्गः।**
**निघ्नस्य मे भर्तृनिदेशरौक्ष्यं देवि! क्षमस्वेति बभूव नम्रः।।**[11]

उत्तररामचरिते कुत्रास्ति सीता परित्यागानन्तरमिति रामो नैव जानाति। रघुवंशे पुनः रामेण सीतायाः परित्यागात्पूर्वमेव निर्धारित आसीन्निवासः वाल्मीकेः आश्रमे। अत एवासौ न प्राप्नोति तादृशीमतितमां दैन्यावस्थामत्र महाकाव्ये सीतापरित्यागजनितां यादृशीं प्राप्नोत्यसौ उत्तररामचरिते सीतापरित्यागे संकल्पिते। तद्यथा–

**विस्रम्भादुरसि निपत्य जातनिद्राम्**
**उन्मुच्य प्रियगृहिणीं गृहस्य लक्ष्मीम्।**
**आतङ्कस्फुरितकठोरगर्भगुर्वीं**
**क्रव्याद्भ्यो बलिमिव दारुणः क्षिपामि।।**[12]

गृहस्था लक्ष्मीः परित्यागव्याजेन मांसभक्षकेभ्योः अर्प्यते बलिरिव इत्यनेन अत्यन्तमाक्रान्तं दृश्यते रामस्य हृदयं क्रूरक्रूरेण सीताविनाशेन अवश्यंभाविना घोरकान्तारे पद्येऽस्मिन् उत्तररामचरितस्य। रघुवंशे एतद्विपरीतो रामः दार्ढ्यमेवावलम्बते न पुनः दैन्यं निश्चिन्तत्वात् परिरक्षणेन सीतायाः तद्गर्भस्य च प्राचेतसस्य आश्रमे।

रघुवंशे कविः लक्ष्मणं न प्राविशदाश्रमे सीतया सह। सीता यदि आश्रमं प्राविक्ष्यत् रामपत्नीत्वेन तर्हि नान्वमोदयिष्यत् महर्षिस्त्यागमासन्नप्रसवायास्तस्याः।



अनेन लोकानुरञ्जनाय क्रियमाणः सम्पूर्णोऽप्युक्रमः रामस्य उदच्छेदयिष्यत एव लोकापवादानुप्राणितः। परित्यागानन्तरं सीतायाः संरक्षणविषयकः महान् प्रश्नोऽप्यत्र उपपद्यत एव।

आश्रमाधीना भवन्ति राजवृत्तयः, न पुनः राजवृत्त्यधीना आश्रमाः। स्वधर्मानुष्ठानेन संपूर्णमपि जगत् सत्पथप्रवर्तनशीलं विधातुं प्रवृत्तस्य महर्षेः संघर्षः लोकानुरञ्जनाय जीवितसर्वस्वमपि परित्यक्तुमुद्यतेन राज्ञा सह भविता इत्येवोपलक्ष्य कविरत्र राममुखेन लक्ष्मणमादिशति 'वाल्मीकिपदं प्रापय्य' एव न तु प्रविश्यापि सीतापरित्यागाय।

रामाय आसील्लोकानुरञ्जनं प्रियं, वाल्मीकये पुनः राष्ट्रस्य प्रियाऽसीद् भाविसंततिः। यदसत्यमासीत् प्रमाणितं हुतवहेन पूर्वमेव तल्लोकापवादजनितं कौलीनमवलम्ब्य क्रियमाणेन परित्यागेन जनकात्मजायाः ऋषिरवश्यमेव उद्विग्नो भविष्यति इत्येवाभिप्रेत्य कविरत्र उपक्रमते सीतापरित्यागमत्यन्तं प्रच्छन्नत्वेन विधिनानेन।

आश्वस्तोऽस्ति रामः रघुवंशे यन्मुनिः सीतामवश्यमेव परिग्रहीष्यति संरक्षणाय परीक्षितकरुणाकत्वात् क्रौञ्चद्वन्द्वप्रसङ्गे स्वयं ब्रह्मणा सम्पूर्णेऽपि लोके–

**तामभ्यगच्छद् रुदितानुसारी कविः कुशेध्माहरणाय यातः।**
**निषादविद्धाण्डजदर्शनोत्थः श्लोकत्वमापद्यत यस्य शोकः।।**[13]

उपासका वयं गर्भस्य। तेनैव लभते ब्रह्मणः सम्पूर्णाऽपि सृष्टिरेषा अस्तित्वम्। मुनिरसौ सीतां परित्रायते तत्कुक्षौ स्थितं गर्भमवेक्ष्य या आसीत् सम्पत्तिः राष्ट्रस्य अपर्यालोच्य सर्वथैव परिचयम्। मुनिरत्र अभिज्ञोऽस्ति यत् क्षेत्रस्य परिरक्षणेन सम्भवति तदधीनस्य बीजस्यापि संरक्षणं वृद्धिगतस्य। धर्मोपदेशप्रवृत्तिमात्रावलम्बिनो न भवन्ति ऋषयः, भवन्ति एते प्राप्तेऽवसरे अत्यन्तं सन्नद्धाः लोकसंरक्षणाय अपि। यद्राज्ञा न साध्यते, यत्र सम्पूर्णमपि शासनं गृहस्थाश्रमवासिनश्च असमर्थाः भवन्ति तदाश्रमेषु चरितार्थतां याति समाजसेवासमर्पितात्मवृत्तिप्रधानेषु, शमादिभिः परिष्कृतान्तःकरणेषु ऋषिभिः विनिर्मितेषु। विशिष्टाभिप्रायगर्भितेऽस्मिन् महाकाव्ये सीतापरित्यागस्य वृत्तान्तमाश्रित्य कविना ऋषिकुलैः प्राप्तसंरक्षणायाः भारतीयायाः संस्कृतेः स्वरूपं प्रतिबिम्बितमस्ति। अत्र राजा कृतसंकल्पोऽस्ति लोकस्य अनुरञ्जनाय, ऋषिश्च लोकस्य रक्षणाय समारोपितसङ्कटस्य। उभयत्रापि दाढर्यं समाजस्य राष्ट्रस्य च सर्वविधोन्नतिसाधकं कर्तव्यकर्मणः तत्त्वतः परिपाकेन।

स्वकीयेषु काव्येषु अभिप्रेतार्थमभिव्यञ्जयितुमाचार्याः साहित्यतत्त्वविदः अलङ्काराणामभिनिवेशाय महाकवीन् प्रेरयन्ति। उपमारूपकार्थान्तरन्यासादयोऽलङ्काराः

कवीनामभिप्रेतार्थमभिव्यञ्जयन्ति लालित्यपूर्णेन विधिना। क्वचिदेते सम्पूर्णमपि लोकमुपदिशन्ति प्रतिपाद्य अर्थजातं सर्वानुप्राणकं सत्सद्मनि। अलङ्कारेष्वेतेषु अर्थान्तरन्यासस्यास्ति विशिष्टं स्थानं यत्र अनेके सार्वभौमाः सर्वजनप्रियाः लौकिकाः सिद्धान्ताः परिगुम्फिता उपलभ्यन्ते व्यवहारविद्भिः महाकविभिः। अवगमनमेतेषां सम्भवति शब्दार्थयोः सौन्दर्योत्पादकेषु अलङ्कारतत्त्वेषु परिश्रमेण। कालिदासादयः कवयः सन्ति अर्थान्तरन्यासप्रियाः प्रकाशनाय स्वकीयां लौकिकीं सर्वजनप्रियां कामपि प्रतिभाम्।

मेघदूतस्य सम्पूर्णमितिवृत्तं विप्रलम्भशृङ्गारगर्भितत्वे सत्यपि सर्वत्र लालित्य-पूर्णमेवास्ति। एतस्मिन्नुपलभ्यन्ते अनेकानि पद्यरत्नानि कवेरभिप्रेतार्थव्यञ्जकानि यत्रोपगूढाः वर्तन्ते लोकोपदेशाः। मेघं याचते यक्षः स्वप्रियां प्रति कुशलक्षेमपूर्णमात्मनः सन्देशं प्रेषयितुम्। कः याचनाविषयः स्यादित्यस्मिन् प्रसङ्गे कविरत्रोपदिशति सम्पूर्णमपि विश्वम्–

**याञ्चा मोघा वरमधिगुणे नाधमे लब्धकामा।[14]**

भुवनविदिते वंशे जातो मेघ आभिजात्यं बिभर्ति याचनाविषयकम्। अधिगुणत्वेन सः याचितव्यः यतो हि गुणान्वितेषु क्रियमाणा याचना असाफल्यं भजमानापि अगौरवाय न भवति न च साफल्यं भजमाना प्रत्युपकारपूर्त्तिमपेक्ष्यते कथमपि याचकाय। अधमपुरुषाः गुणहीनत्वेन न याचितव्याः कथमपि लोकव्यवहारज्ञैः जनैः। प्रत्युपकारमपेक्षन्ते एते प्राप्तावसरेषु। याचनायाः असाफल्यञ्चात्र महते अगौरवाय भवति लोकस्य।

प्रत्युपकारस्त्ववश्यमेव कर्तव्यः उपकृतैः जनैः झटित्येव इति उपदिशति श्रीहर्षः हंसमुखेन नैषधीयचरिते एवम्–

**अचिरादुपकर्तुराचरेदथवात्मौपयिकीमुपक्रियाम्।**
**पृथुरित्थमथाणुरस्तु सा न विशेषे विदुषामिह ग्रहः।।[15]**

यथासामर्थ्यमुपकृतैः जनैः उपकर्तुः प्रत्युपकारो झटिति कर्तव्यः। गुणग्राहिणः उपकर्तारः कृतज्ञतां पश्यन्ति अत्र न पुनरुपक्रियाया अधिकत्वमल्पत्वं वा।

अपूर्णत्वं लोकस्य कस्मिन्नपि क्षेत्रे अगौरवाय भवति पूर्णत्वं पुनः गौरवाय इत्युच्यते मेघदूतकविना–

**रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय।[16]**

शारीरिकं मानसिकमाध्यत्मिकञ्चास्ति बलत्रयमत्यन्तमनिवार्यं लोकोदधिं तर्त्तुम्।



सम्पूर्णस्यापि जीवनस्य सारभूतायाः मुक्तेर्लाभः पूर्णत्वेन भवति न पुनः अपूर्णत्वेन जनेभ्यः। तदस्ति पूर्णत्वं सन्निहितं सिद्धौ बलत्रयस्य, सर्वत्र कार्यसिद्ध्यर्थं प्रवर्तमानेषु जनेषु।

कालिदासः तान् न मनुते धीरान्, ये विकाररहित्ये भजन्ते धीरत्वम्। त एव धीराः भवन्ति ये धर्ममार्गात् न प्रविचलन्ति पदमुपस्थितौ विकाराणामपि–

**विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः।**

भगवतः शङ्करस्य निन्दायां प्रवृत्तं प्रच्छन्नत्वेन समागतं तत्परीक्षणाय ब्रह्मचारिणं संबोध्य तपसि संलग्ना पर्वतराजकन्यका उपदिशत्येवम्–

**न केवलं यो महतोऽपभाषते**
**शृणोति तस्मादपि यः स पापभाक्।।[17]**

यः पूज्यानपभाषते स एव केवलं न भवति पापभाक् अपितु यस्तत् शृणोति सोऽपीति स्मृतिः–

**गुरोः प्राप्तः परीवादो न श्रोतव्यः कथञ्चन।**
**कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः।।[18]**

कथामुखेनात्र कविः सम्पूर्णं समाजमुपदिशति अत्यन्तं प्रियमभिप्रायगर्भितं चार्थजातं स्वकीयं यस्यानुगमनेन सर्वत्र सौख्यं भजते प्रतिष्ठाम्। एवं व्यवहृते कोऽप्यात्मानमुपेक्षितं नानुभविष्यति समाजे।

लौकिकाः पदार्थाः प्रायेण दृश्यन्ते विकीर्णा एव। एकत्र नोपलभ्यते सर्वगुणसंपन्नत्वं कस्मिन्नपि अनित्यत्वावच्छिन्ने लौकिके पदार्थे इति तु सत्यं सर्वजनानुभवतां याति। महाकवेः विद्याविद्योतितान्तःकरणस्य कालिदासस्य कविप्रतिभायामत्र स्फुरन्ति वचांस्येतानि सर्वसहृदयहृदयमुकुलानि मकरन्दस्पन्दविधायीनि–

**प्रायेण सामग्र्यविधौ गुणानां पराङ्मुखी विश्वसृजः प्रवृत्तिः।।[19]**

विधात्रा विधीयन्ते विविधाः पदार्थाः सकलगुणसन्दोहविधुराः विधिना विनिर्मिता अपि। सर्वत्र विदधात्येष वैकल्यं गुणविषयकं यत्किञ्चिद् स्वभावनिर्मितं सर्वजनानु-भवगोचरीक्रियमाणम्। सर्वजनाह्लादकारिणि चन्द्रमसि कलङ्कित्वं वर्णप्रकर्षान्विते कर्णिकारमुकुरे नैर्गन्ध्यञ्च दोषाय भवति। सम्पूर्णायामपि सृष्टौ सर्वैरप्यनुभूतं सत्यमेतन्निधाय मनसि पुनरपि स्फुरति कालिदासस्य प्रतिभाप्रकर्षः अन्यथैव अन्यत्र एवम्–

**एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः।।**[20]

सत्यपि दोषलेशे पदार्थानां गुणप्रकर्षान्वितत्वं भवेन्महत्त्वाय। गुणप्रकर्षाच्छादितेषु पदार्थसार्थेषु अपकर्षाय न प्रभवन्ति केचन दोषाः समुपजातान्वया जन्मनाऽपि। प्रकृतेः विश्वसृजा गुणप्रियत्वाद् अननुसर्तव्या दोषदृष्टिः सर्वैरप्यनुरक्तैरत्र। अत एव शशाङ्कस्य कलङ्कित्वं सातत्येनोद्वमनेन मरीचीनामानन्दप्रदानां प्रकृतये चराचरात्मिकात्मने महते प्रहर्षाय दोषान्वितत्वेन न प्रकल्प्यते केनापि सहृदयत्वान्वितहृदयेन।

कालिदासः न केवलं परिचिनोति भौतिकं प्राकृतिकमर्थजातमेव सातत्येन साकल्येन अपितु चैतन्येनानुप्राणितां सर्वविधप्रातिभगुणानुप्राणितां वा प्रकृतिमप्यत्यन्तं गभीरत्वेन सर्वत्र। मनसः संकल्पविकल्पात्मकतया प्रसिद्धिः सर्वशास्त्रवित्सु विदिता एव। किन्तु तदेतद् दुर्वारमेव भवति इष्टार्थाभिनिविष्टमिति महाकविः अभिव्यञ्जयति कस्यामपि अभिप्रायविशेषान्वितायां वाचि स्वकीयायामेवम् अर्थान्तरन्यासालङ्कारगर्भितायाम्-

**क ईप्सितार्थस्थिरनिश्चयं मनः**
**पयश्च निम्नाभिमुखं प्रतीपयेत्।।**[21]

न प्रतीपायते गतिर्जलस्य निम्नाभिमुखस्य यथा यत्नातिशये कृतेऽपि तथैव न भजते वैपरीत्यमिष्टार्थे स्थिरनिश्चयं मनः सताम्। कविरत्र उपदिशति सम्पूर्णं लोकं यदपेक्ष्यते दृढनिश्चयस्य प्रतिष्ठा मनसि जनानां कार्यसिद्ध्यर्थं, नानुसर्तव्या निम्नाभिमुखी प्रवृत्तिश्चात्र नीतिविघातिनी कथमपि स्वप्नेऽपि जनैः धर्मानुप्राणितान्तःकरणैः। लक्ष्यपूर्तिः संकल्पेन सम्भवति दार्ढ्यमापन्नेन संस्कारातिशयबलात् प्रतिदिनम्। संकल्पहीनाः भजन्ते कांदिशीकत्वं जीवने निबिडाज्ञानान्धकारेण आक्रान्ताः। इत्येवास्ति अभिप्रायगर्भितत्वं महाकवेः पद्यरत्नेऽस्मिन्।

नियतिः प्रबलायते सर्वत्र जीवने मनुष्याणाम्। कृतभूरिपरिश्रमाणां कृते विपरिणामोऽस्याः यत्किञ्चिद् भजते शैथिल्यमनिष्टञ्चावरुध्यते तेषां सुकृतमापन्नानाम्। महाकविः श्रीहर्षः उपनिबध्नात्यत्र पद्यमेतद् विधेरिच्छामुपपादयितुं प्रबलतमाम्-

**अवश्यभव्येष्वनवग्रहग्रहा यया दिशा धावति वेधसः स्पृहा।**
**तृणेन वात्येव तयाऽनुगम्यते जनस्य चित्तेन भृशाऽवशात्मना।।**[22]

तृणवद् व्यवहरन्ति मनांसि जनानामपहतानि विधेरिच्छया। सम्पूर्णोऽपि जीवनसरणेः सारोऽत्र सन्निहितोऽस्ति यदस्ति विश्वसृजः इच्छा अत्यन्तं प्रबला या प्रवर्तयति लोकं विस्फूर्जितपरिमाणेषु लोकवृत्तेषु अधिकृत्य कर्मपरिपाकपरिपाटीं अपूर्वापर-पदाभिधेयाम् असंशयेन। असम्भवकल्पमपि वृत्तमुपपद्यते विधेरिच्छायाः सत्यानुकूल्ये



जीवने सदसद्विवेकद्योतितान्तःकरणयुते। अत एव कर्तव्यकर्मण्यधिकृताः जनाः विहाय तज्जनितफलाकाङ्क्षां प्रवर्तमानाः स्युः विधिविहितमार्गे लोकसिद्ध्यर्थं विनिर्धारिते। कर्तव्यकर्मविषयको भगवतो नारायणस्य सम्पूर्णोऽपि नरमभिप्रेरयितुमुपनिबद्धः उपदेशः गीतोपनिषत्सु एकस्मिन् पद्यरत्ने सारत्वेन संगृह्य कविरत्र प्रमाणयति अभिप्रेतार्थव्यञ्जन-विषयिणीं स्वकीयां सर्वजनोपकर्त्रीं प्रतिभाम्।

धैर्यमप्रतिष्ठितमेव दृश्यते लोकेऽस्मिन् साम्प्रतिके भूयसे फललाभाय प्रवर्तमानेषु जनेषु। झटित्येव अपेक्षन्ते कार्यसिद्धिं जनाः अविचार्य तत्सिद्धये स्वीकृतस्य अध्वनः सत्यासत्यत्वम्। प्रतिदिवसं क्रियमाणेन समर्पकत्वेन कर्तव्यकर्मणा उत्पद्यते संस्कारः। दार्ढ्येन चास्य कालक्रमानुगतेन कार्यसिद्धिमन्तः भवन्ति जनाः। सैषा सिद्धिः स्थिरत्वं भजते सत्ये प्रतिष्ठितत्वात् संकल्पे तज्जनिते संस्कारविशेषे च। उपदिशत्यत्र भारविः सार्वभौमिकं सिद्धान्तविशेषं लोकाधारभूतं प्रतिष्ठापनाय धैर्यस्य उद्विग्नमनःसु असत्यमप्यवलम्बनाय प्रवृत्तेषु भूयसे फललाभाय झटित्येव-

**सहसा विदधीत न क्रियामविवेकः परमापदां पदम्।**
**वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः।।**[23]

सत्यासत्यनिर्धारणसामर्थ्याभाव एव अविवेकः। तदनुप्राणितः उद्योगश्चरितार्थोऽपि जनयति महद् वैक्लव्यमेव मनसि आजीवनम्। चित्तोद्वेग एष प्रकटयत्यस्थैर्यं जीवने, तेन जायते अप्रतिष्ठा समाजे। सार्वजनिके जीवने प्रविष्टान् जनानवलोकयति सम्पूर्णोऽपि लोकः, कालश्चात्रास्ति परीक्षकः नियामकश्च कस्यापि स्थिरभूतस्य परिणामातिशयस्य। अविवेकगदाक्रान्तेभ्यः अनुन्मीलितान्तःकरणवृत्तयः श्लाघन्ते न पुनः प्रायेण सर्वतो-भावेनोन्मीलितान्तःकरणः समाजः लोको वा। सत्यमाश्रित्य प्रवर्तमानेषु प्रसीदति लक्ष्मीः गुणैकलुब्धा। असत्यमवलम्ब्य प्राप्तावसरेष्वपि न प्रसीदति लक्ष्मीः जाताल्प-वैभवोद्भूतिसामर्थ्या, चाञ्चल्येन निगीर्णा स्वाभाविकेन स्वकीयेन भवति अविवेकोद्भूतं सामर्थ्यप्रतिष्ठायै कालेन विवेकोद्भूतं पुनः स्थिरभूतायाः सम्पत्तये।

संस्कृतकवयः प्रतिवाक्यं सन्नद्धाः दृश्यन्ते उपदेष्टुमुपकर्तुञ्च सम्पूर्णमपि लोकमनालोच्य सीमानं धर्मवर्गक्षेत्रादिभिः परिकल्पितमनित्यत्वेन जनैः लौकिकैः मर्त्यैः। एतेन प्रमाणीभवति महाकवीनामपूर्वं सामर्थ्यं कमपि अभिप्रेतार्थप्रकाशननिपुणम्। एतेषु वचनरत्नेष्वनिर्वचनीया भगवती प्रतिभा प्रवर्तमाना अनुभूयते प्रत्यक्षं साहित्यतत्त्वान्वेषणनिपुणैः सामाजिकविशेषैः कविनिष्ठा। कविः सहृदयश्चेत्युभयनिष्ठा प्रतिभा अपरिहार्या अवगन्तुमभिप्रायगर्भितत्वं कवीनां वचनरत्नेषु प्रतिपदं विलसत्।

अत एवोच्यते महामहेश्वरेणाभिनवगुप्तपादाचार्येण काव्यालोकलोचनारम्भे-

अपूर्वं यद् वस्तु प्रथयति विना कारणकलां
जगद् ग्रावप्रख्यं निजरसभरात् सारयति च।
क्रमात् प्रख्योपाख्या प्रसरसुभगं भासयति यत्
सरस्वत्यास्तत्त्वं कविसहृदयाख्यं विजयते।। इति।

## सन्दर्भाः


1. ध्वन्यालोकः 1.8
2. बालरामायण् 1.8
3. रघुवंशम् 2.34
4. रघुवंशम् 2.48
5. अभिज्ञानशाकुन्तलम् 1.12
6. उत्तररामचरितम् 1.12
7. उत्तररामचरितम् 1.38
8. उत्तररामचरितम् 1.39
9. उत्तररामचरितम् 1.41
10. रघुवंशम् 14.45
11. रघुवंशम् 14.58
12. उत्तररामचरितम् 1.49
13. रघुवंशम् 14.70
14. मेघदूतम् 6
15. नैषधीयचरितम् 2.14
16. मेघदूतम् 20
17. कुमारसम्भवम् 1.59
18. मनुस्मृतिः
19. कुमारसम्भवम् 3.28
20. कुमारसम्भवम् 1.3
21. कुमारसम्भवम् 5.5
22. नैषधीयचरितम् 1.120
23. किरातार्जुनीयम् 2




# आत्मतत्त्वविमर्शः

डॉ. अशोककुमारः

संस्कृतवाङ्मये आध्यात्मिकं विवेचनं प्रायः सर्वत्रोपनिषदादिषु ग्रन्थेषु समुपलभ्यते। आत्मतत्त्वं ब्रह्मतत्त्वं शब्दतत्त्वं वेत्यादिविविधाधारविषयत्वमिति। गीतायां विस्तरेण प्रतिपादितं भवत्यात्मतत्त्वम्-

**"नैनं छिन्दन्ति शस्त्राणि, न जायते म्रियते वा कदाचिदिति।"**[1]

ज्ञानाश्रयत्वं ज्ञानस्याधारत्वम्। ज्ञानं हि स्वसत्तामात्रेण स्वव्यवहारहेतुरात्मधर्मः। तत्रात्मनः स्वप्रकाशत्वेऽपि दीपप्रभावदाधाराधेयभावः। अत एव "एष हि द्रष्टा श्रोता मन्ता"[2] इत्यादिश्रुतिः संगच्छते। तथा च लोके संप्रत्यय एष अहं जानामीति, न त्वहं ज्ञानमिति। कर्तृभोक्तृत्वे ज्ञानस्यैवावस्थाविशेषे, तेन तदाश्रयत्वमप्यात्मनः सिद्धम्। कर्तृत्वम् आत्मन ईश्वराधीनमेव न स्वतन्त्रम्। ईश्वरोऽपि केवलमनुमतिं ददाति प्रयत्नादिकं त्वात्मैव विदधाति। बृहदारण्यकोपनिषदि **"य आत्मनि तिष्ठन्" "य आत्मानमन्तरो यमयति"**[3] इत्याद्यन्तर्यामि ब्राह्मणमुपपद्यते। सोऽयमात्मा नेश्वरात्पृथग्भूतोऽपि तु तस्य शरीर एव। अत एव चिदचिद्विशिष्ट ईश्वरः। सोऽयमात्मा त्रिविधः-बद्धमुक्तनित्यभेदात्। बद्धाः संसारिणो सुखदुःखादिपरम्परामनुभवन्तः आसते। मुक्ताः निवृत्तसंसारा निष्कामकर्मभिश्चित्तशुद्धौ भगवति विशेषानुरागेण तदीयकृपया संसारान्निवृत्त्य भगवल्लोकं गत्वा स्वस्वरूपानुभवं कुर्वाणाः केवला इत्युच्यन्ते। कदापि संसारमप्राप्ताः शेषगरुडादयः पार्षदा नित्याः। एते त्रिविधा अप्यात्मनोऽनन्ताः। आत्मैक्यस्वीकारे बद्धमुक्तगुरुशिष्यव्यवस्थादयो न स्युः। येऽप्यौपाधिकभेदं स्वीकुर्वन्ति, तेषामप्युपाधिनिवृत्तौ मुक्तावस्थायां श्रुत्यादिप्रतिपादितस्य भेदस्यासंगतिः स्यात्। तथा च-**"मुक्तानां परमा गतिः"**, **"मम साधर्म्यमागताः"**[4] इत्यादि शास्त्राण्यनेकात्मत्वे प्रमाणत्वेनावतिष्ठन्ते।

महातन्त्रमते त्रयः पदार्थाः। पतिः शिवः, पशवः जीवाः, पाशाः प्रावृत्तिरीशो बलं कर्म च। तत्र पतिः शिवो नैयायिकमत इव विलक्षणकार्येण कर्तृरूपोऽनुमीयते। एतेषां विषये विविधं विशिष्टाध्ययनं भवति। प्रत्यभिज्ञानदर्शने परमेश्वरः सर्वशक्तिसम्पन्नः

स्वेच्छावशादेव जगन्निर्मिमीते। स च परमेश्वरोऽनन्यमुखप्रेक्षित्वलक्षणस्वातन्त्र्यसम्पन्नः स्वात्मदर्पणे प्रतिबिम्बवदवभासते। तत्र जीवा माहैश्वर्यसम्पन्ना अनन्ता विभवश्च। एतेषां मुक्तौ प्रत्यभिज्ञैवापेक्ष्यते तथा चोक्तं शिवदृष्टौ-

**एकवारं प्रमाणेन शास्त्राद्वा गुरुवाक्यतः।**

**ज्ञाते शिवत्वे सर्वस्थे प्रतिपत्त्या दृढात्मना।।**

**करणेन नास्ति कृत्यं क्वापि भावनयाऽपि वा।**

**ज्ञाते सुवर्णे करणं भावनां वा परित्यजेत्।।**

तत्र परमेश्वरः परार्थरूपं प्रयोजनमपेक्ष्यैव प्रत्यभिज्ञानमुत्पादयति। जीवानां माहेश्वर्यशक्तिसम्पन्नत्वेन नित्यत्वेऽपि मायायाः स्वभाववशात् शक्तिस्तिरोहिता भवति, पुनरपि, प्रत्यभिज्ञावशात् सा सम्पद्यते। तथा चानुमानम्-

**अयमात्मा परमेश्वरो भवितुमर्हति, ज्ञानक्रियाशक्तिमत्त्वात्,**

**यो यावति ज्ञाता कर्त्ता च स तावतीश्वरः प्रसिद्धेश्वरवत्,**

**आत्मा च विश्वज्ञाता कर्त्ता च, तस्मादीश्वरः।**

नित्यस्य दिव्यदेहस्य भगवच्छरीरस्य भागवतादिपुराणे बहुलं प्रसिद्धिः। भागवतदर्शनेऽपि प्रसिद्धिः। तथा च शास्त्रोक्तविधिना सिद्धं रसेन्द्रं संसेव्यदीप्यं शरीरं सम्पाद्य पश्चात् योगाभ्यासादिनाऽन्येन च शास्त्रोक्तेनोपायेन परतत्त्वे दृष्टे जीवन्मुक्तिर्भवति। तथा च श्रुतिः-

**रसो वै सः। रसं ह्येवायं लब्ध्वाऽऽनन्दीभवति।**[5]

अद्वैतवेदान्तिनां मते तत्त्वपदार्थसंशोधनक्रमेण शुद्धतत्तदर्थोपस्थितौ भागत्याग-लक्षणया **"तत्त्वमसि"**, **"आत्माऽयं ब्रह्म"**, **"आनन्दं ब्रह्म"**, **"अहं ब्रह्मास्मि"** इत्यादिमहावाक्येभ्योऽखण्डार्थशुद्धब्रह्मज्ञाने सर्वकार्यसहिताया मायाया अज्ञानरूपायाः प्रविलये शुद्धसच्चिदानन्दरूपं ब्रह्म स्फुरति पारमार्थिकम्। ततोऽन्ये जीवेश्वरसंसाररूपाः सर्वे पदार्थाः ब्रह्मणो विवर्त्ता भ्रमरूपा एव नास्ति किञ्चिदन्यतत्त्वम्, एकस्य तत्त्वादप्रच्युतस्य भेदानुकारेणासत्यविभक्त्यान्यरूपोपग्राहिता विवर्त्त इति लक्षणात्। अत एवास्याद्वैतमिति व्यवहारः। परन्तु व्यवहारकाले जीवेश्वरादिविभागः सर्वः सांसारिकः संसरत्येव। अखण्डार्थो नाम संसर्गानवगाहि ज्ञानं प्रातिपदिकार्थमात्रं वा। तदुक्तं चित्सुखाचार्येण-

**संसर्गासङ्गिसम्यग्धीहेतुता या गिरामियम्।**

**उक्ताऽखण्डार्थता यद्वा तत्प्रातिपदिकार्थता।।**



यद्यपि-**"द्वा सुपर्णा सयुजा सखाया"**[6] इत्यादिकया सृष्ट्यादिप्रतिपादिकया च श्रुत्या प्रत्यक्षेण च विरोधात् जगतोऽतात्त्विकत्वं न स्यात् तथाप्युपक्रमोपसंहारादि-षड्विधतात्पर्यनिर्णायकेन लिङ्गेनाद्वैत एव सर्वासां श्रुतीनां तात्पर्यावधारणात् तदेव सर्ववेदान्तसिद्धम्। वेदान्तिमते व्यवहारविषयो जीवः क इति मीमांसायामनादिरनिर्वचनीया माया चित्सम्बन्धिनी वस्तुतश्चिद्भिन्ना चिति प्रतिभासमाना वर्त्तते। तस्याश्चातीव स्वच्छत्वात् चित्तस्यां प्रतिबिम्बते। स च प्रतिबिम्ब ईश्वरः। तस्या एव मायाया आवरणविक्षेपशक्तिमत्स्वविद्याभिधानेषु परिच्छिन्नानन्तप्रदेशेषु चित्प्रतिबिम्बा अनन्ता जीवा विभवश्च। अपरेषां विद्यारण्यस्वामिनां मते तत्त्वविवेकप्रकरणानुसारेण सत्त्वरज-स्तमोगुणात्मकमूलप्रकृते रूपद्वयम्-सत्त्वप्रधाना माया, तमःप्रधानाऽविद्या च। तत्र मायायां चिद्रूपस्य ब्रह्मणः प्रतिबिम्ब ईश्वरः, अविद्यायां मलिनसत्त्वायां तस्यैव प्रतिबिम्बो जीवः। तदुक्तम्-

**सत्त्वशुद्ध्यविशुद्धिभ्यां मायाविद्ये च ते मते।**

**मायाबिम्बो वशीकृत्य तां स्यात् सर्वज्ञ ईश्वरः।।**

**अविद्यावशगस्त्वन्यस्तद्वैचित्र्यादनेकधा।।**[7]

संक्षेपशारीरकमते सर्वकारणभूतायामविद्यायां प्रतिबिम्ब ईश्वरः। अन्तःकरणे प्रतिबिम्बो जीवः। अत एव जीवानामनेकत्वम्, अन्तःकरणभेदात्। तथा च श्रुतिः- कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः।[8] बृहदारण्यके-"प्रज्ञानधन एवैतेभ्यः समुत्थाय तान्येवानु विनश्यति"[9] "अविनाशी वा अरेऽयमात्मा"[10] इत्यादिश्रुतिर्जीवकूटस्थाभिप्रायेण वर्त्तते। एवमानन्दमयविज्ञानमयरूपेण जीवो द्विविध इत्यपि ब्रह्मानन्दप्रकरणे पञ्चदश्यामुक्तम्। विवरणानुसारिणां मतेन बिम्बस्थानीय ईश्वरः, प्रतिबिम्बस्थानीयो जीवः। तदुक्तम्-

**विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते।**

**आत्मनो ब्रह्मणोऽभेदमसन्तं कः करिष्यति।**[11]

अन्येषां मते तु न प्रतिबिम्बो नाप्यवच्छिन्नो जीवः, किन्तु कौन्तेयस्य राधेयत्ववद् ब्रह्मण एवाविद्या जीवभावः। व्याधकुलसंवर्धितराजकुमारदृष्टान्तेन ब्रह्मैव स्वविद्यया बद्धं भवति, स्वविद्यया च मुक्तं भवति। केषाञ्चिन्मते एकस्यैव जीवस्य सर्वशरीरेष्ववस्थानं भवति।

वाचस्पतिमिश्राणां मते त्वज्ञानं न शुद्धचैतन्याश्रयम्, किन्तु जीवाश्रयं ब्रह्म-विषयम्। तच्च जातिवद् व्यक्तिष्वनेकेषु जीवेषु वर्त्तमानमुत्पन्नविद्यया नष्टव्यक्तिं जातिरिव त्यजति। अद्वैतवेदान्तिसंयतं यत् सर्वपरिकल्पनातीततत्त्वं भेदसंसर्गसमति-

क्रमेण समाविष्टं सर्वाभिः शक्तिभिर्विद्याविद्याप्रविभागरूपमप्रविभागं कालभेददर्शनाभ्यासेन मूर्तिविभागभावनया च व्यवहारानुपपत्तिभिर्धर्माधर्मैः सर्वास्ववस्थास्वनाश्रितानादिनिधनं ब्रह्म, तदेव भिन्नरूपाभिमतानामपि विकाराणां प्रकृत्यन्वयित्वाच्छब्दोपग्राह्यतया वैयाकरणानां शब्दतत्त्वम्। वाक्यपदीये भर्तृहरिणाप्युक्तम्–

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।**
**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः।।**[12]

इत्थमात्मतत्त्वविवेचने विविधानां बुधानां विविधात्मिका प्रवृत्तिः दृश्यते।

## सन्दर्भाः


1. श्रीमद्भगवद्गीता 2.23
2. प्रश्नोपनिषद् 4.9
3. बृहदारण्यकोपनिषद् 3.7.22
4. श्रीमद्भगवद्गीता 14.2
5. तैत्तिरीयोपनिषद् 2.7.9
6. ऋग्वेदः 1.164.20
7. पञ्च. 1.16-17
8. त्रि. म. ना. 4.8
9. बृहदारण्यकम् 4.5.13
10. बृहदारण्यकम् 4.5.14
11. विष्णुपुराणम् 67.14
12. वाक्यपदीयम् 1.1




# महाकविकुमारदासस्य सौन्दर्यानुभूतिः

**डॉ. त्रिलोचनप्रधानः**

सौन्दर्यमेकः आकर्षकगुणोऽस्ति। प्रकृतेः प्रत्येकं पदार्थे विद्यमानं भवतीदं सौन्दर्यम्। सौन्दर्यस्य स्वरूपं द्विविधम्–बाह्यम् आन्तरिकञ्च। वस्तुनः व्यक्तेः वा दर्शनमात्रेण तस्य बाह्यसौन्दर्यस्य ज्ञानं भवति, परन्तु आन्तरिकसौन्दर्यस्य ज्ञानं दर्शनमात्रेण भवितुं नार्हति। यतो हि वस्तुनः व्यक्तेः वा गुणवत्ता एव आन्तरिकसौन्दर्यस्य द्योतिका भवति। अतः आन्तरिकसौन्दर्यस्य ज्ञानं तदा भवति यदा वस्तुनः व्यक्तेः वा व्यावहारिकपक्षस्य ज्ञानं भवति। यद्यपि बाह्यसौन्दर्यमस्थायि द्रष्टव्यं तथा च आन्तरिकसौन्दर्यं स्थायि अनुभाव्यं च भवति तथापि उभे स्वमूल्यनिष्ठताहेतोः आदृते आकर्षके च स्तः। प्रथमं नयनाकर्षकम् अपरं च चित्ताकर्षकं भवति। अर्थात् बाह्यसौन्दर्यं दृष्टिशक्तिमाकर्षयति आन्तरिकसौन्दर्यं च चित्तं मनः वा। अनेन प्रकारेण उभे क्रमशः मनुष्यस्य दृष्टये चित्ताय च पाथेयप्रदानं कुरुतः।

दृष्टिशक्तेः दीर्घता चित्तस्य दृढता च अनुभवसिद्धे इति कुमारदासः। कुमारदासेन जानकीहरणमहाकाव्ये सौन्दर्यपरकमूल्यानां यथा चित्रणं क्रियते तस्मात् ज्ञायते यत् तस्य दृष्टिः चित्तं च सौन्दर्यस्य आकर्षकता, कमनीयता, मनोहरता, मोहकता, चमत्कारिता इत्येताभिः सह सुपरिचितम् आसीत्। सौन्दर्यपरकमूल्यानां निरूपणप्रसङ्गे कविकुमारदासेन जानकीहरणमहाकाव्ये यत्किञ्चिद् उल्लिखितं तस्य विभाजनं निम्नरूपेण कर्तुं शक्यते–

1. बालसौन्दर्यम्
2. स्त्रीसौन्दर्यम्
3. प्राकृतिकसौन्दर्यम्

## 1. बालसौन्दर्यम्

जानकीहरणमहाकाव्ये बालसौन्दर्यस्य संक्षिप्तविवेचनं प्राप्यते। बालसुलभचपलतायाः स्वाभाविकचित्रणं दृश्यते काव्येऽस्मिन्। यथा–

**मुखमाहतधूलि गण्डयोः करघृष्टाञ्जनदानमस्य तत्।**
**विबभौ सुरदन्तिनो यथा वदनं दन्तचतुष्टयोज्ज्वलम्।।[1]**

श्लोकेस्मिन् क्रीडारतबालकानां यथार्थस्थितिं स्वाभाविकसौन्दर्यं च लक्षयति महाकविः। अर्थात् रजोवृत्ते शरीरे दन्तचतुष्टयं शोभते। हस्तचालनेन चक्षुषः दलनेन वा मुखे अञ्जनस्य लेपनं जातम् अस्ति। एतादृशः रामः सुरदन्ती इव विभाति। बालस्य अनुकरणीयप्रवृत्तिवशात् बालसौन्दर्यम् अनुपमतां प्राप्नोति। प्रवृत्तिरियं बालस्य चित्ताकर्षिका भवति। अस्य मनोरमं चित्रणं कृतमस्ति जानकीहरणे कवि-कुमारदासेन। यथा–

**अयि दर्शय तत्किमुन्दुराद् भवतोपात्तमिति प्रचोदितः।**
**प्रविदर्शयति स्म शिक्षया नवकं दन्तचतुष्टयं शिशुः।।[2]**

वदतु त्वया मूषकात् किं स्वीकृतमिति प्रश्नस्य उत्तररूपेण नूतनां दन्तपक्तिं दर्शयति रामचन्द्रः। कविकुमारदासेन न केवलं रामचन्द्रस्य बालसुलभचपलतां गुणं वा दर्शयति अपितु दशरथस्य सर्वेषां पुत्राणां बालसुलभचपलतामङ्कयति जानकीहरणे। यथा–

**शयनीयगतस्य भूपतेः शिशवः क्रोडानिवेशवाञ्छया।**
**निशिवर्धितमातृसंपदं कलहं कोमलजल्पितं दधुः।।[3]**

भावोऽयं यत् भूपतिः रात्रौ शय्यायामस्ति, तस्य वक्षसः उपरि शयनार्थं पुत्राः मधुरवाण्या कलहं कुर्वन्ति स्म। पुत्राणां मध्ये एतादृशं कलहं दृष्ट्वा तेषां मातॄणां वात्सल्यस्नेहः स्फुटति। कविकुमारदासेन जानकीहरणस्य प्रथमसर्गे मृगशावकानां बालसौन्दर्यमपि अङ्कितम्–

**उत्कर्णमुत्पुच्छ्यमानमासे विदर्शिताभ्याहतकन्दुकोत्थम्।**
**परिप्लवाक्षं मृगशाववृन्दमीषन्निपातेन शरेण राजा।।[4]**

श्लोकेऽस्मिन् कविकुमारदासेन मृगशावकानां स्वभावसुन्दरमाचरणं चक्षुषः चञ्चलत्वञ्च चित्रयति। बालानां निष्कपटता–अनुकरणीयता–स्निग्धता–चपलतादिगुणानां मनोरमचित्रणं दृश्यते जानकीहरणे महाकाव्ये।

## 2. स्त्रीसौन्दर्यम्

सौन्दर्यस्य प्रतिमूर्तिर्भवति स्त्री। अस्य बाह्यसौन्दर्यम् यादृशं मोहकं भवति तादृशं रमणीयं भवति आन्तरिकसौन्दर्यम्। कुमारदासस्य जानकीहरणे स्त्रीणाम् आन्तरिक–बाह्यसौन्दर्ययोः सुष्ठु चित्रणं परिदृश्यते। एकपक्षे स्वस्थनिरोगसुन्दरवदनानां



युवतीनां शरीरं, सुन्दरकेशपाशस्य संयोगात् लावण्यरत्नस्य आभां प्रकटयति–

**प्रवालशीर्षा वदनं सुवर्णं मुक्तामयाङ्गावयवा वहन्त्यः।**
**यस्यां युवत्यो विहिता विधात्रा रत्नैरिवापूर्वैंपुषः प्रकर्षम्।।[5]**

अपरपक्षे तस्याः त्रिवली एतादृशी शोभायमाना आसीत् यथा सम्पूर्णभुवनेषु अन्वेषणानन्तरम् असफलेन ब्रह्मणा गणितं रेखात्रयं निर्मितम्। अहो कुमारदासस्य वर्णनचातुर्यम्–

**अस्योदरस्य प्रतितुल्यशोभं नास्तीति धात्रा भुवनत्रयेऽपि।**
**संख्यानरेखा इव संप्रयुक्तास्तिस्रो विरेजुर्बलयः सुदत्याः।।[6]**

कविः स्त्रीसौन्दर्यस्य पराकाष्ठादर्शनप्रसङ्गे स्त्रीयमुपवनस्य लक्ष्मीरिति बोधयति **बाले त्वमस्योपवनस्य लक्ष्मीरिति।** दशरथस्य पाणिग्रहणसमये सुमित्रायाः शरीरलावण्यमेतादृशमासीत् यथा कमलसदृशकरयुक्तायाः भगवत्याः पार्वत्याः शोभा परमेश्वरशिवस्य पाणिग्रहणसमये आसीत्।

**सुमन्त्रसूतस्य सुमित्रयाग्नौ पाणिग्रहं लम्भितया द्विजेन।**
**पुण्यं भवान्या भवहस्तसक्तहस्ताम्बुजया वपुराललम्बे।।[7]**

स्त्रीसौन्दर्यस्य आकर्षकतामनोहरताकोमलताश्च अङ्कितुं तस्य समता माधवीलताकुञ्जेन सह करोति कविकुमारदासः–

**स्निग्धद्विजालीरुचिरं प्रियङ्गुश्यामद्युतिश्चारुतमालकान्ता।**
**बिभर्षि गन्धाहतभृङ्गचक्रं सन्माधवीमण्डपमेतदास्यम्।।[8]**

जानकीहरणस्य अध्ययनात् प्रतीयते यत् कुमारदासः स्त्रीणां बाह्यसौन्दर्यस्य अपेक्षयाऽऽन्तरिकसौन्दर्यं महत्त्वपूर्णं स्वीकरोति। यतो हि सौन्दर्यमिदं सुखप्रदं स्थायि च भवति। लज्जाविनयशीलताशिष्टतादयो गुणाः नारीणामेतादृशानि स्थाय्याभूषणानि सन्ति येन नारीणां सुन्दरता वर्द्धिता भवति। कुमारदासस्य स्त्रीपात्राणां भूषणम् अस्ति लज्जा तथा परम्परया प्राप्ताऽस्ति विनयशीलता शिष्टता च। अनेन तासाम् आन्तरिकसौन्दर्यं द्विगुणितं भवति। जानकीहरणस्य सीता नम्रतायाः प्रतीकम् अस्ति। लज्जाशीलायाः सीतायाः बहुमुखि सौन्दर्यं चित्ताकर्षकम् –

**कलत्रभारेण कुचद्वयस्य स्थाम्ना तथा मन्थरविक्रमायाः।**
**आसीत् स तस्या गतिमन्थरत्वेऽसौ राजपुत्रोऽपि तृतीयहेतुः।।[9]**

अनेन प्रकारेण नम्रतायाः प्रतिमूर्तिः, कर्त्तव्यं प्रति सचेष्टा, समर्पणभावमण्डिता संस्कारपूतादिगुणैः परिपूर्णा सीता स्वमूल्यनिष्ठतया स्त्रीणामादर्शरूपेण प्रतिष्ठिताऽस्ति। एतदर्थं सा स्वामिनः रामचन्द्रस्य कस्यापि निर्णयस्य प्रतिवादं न करोति। अनेन

प्रकारेण कुमारदासः नारीसौन्दर्यस्य अन्तरङ्गमूल्यं प्रकटयति गम्भीरता, सहनशीलता इत्याद्यन्तरङ्गगुणमाध्यमेन स्त्री स्वमूल्यवत्तां समग्रसंसारे स्थापयितुं समर्था भविष्यतीति सूचयति।

## 3. प्राकृतिकसौन्दर्यम्

आकर्षणं सौन्दर्यस्य प्राणतत्त्वमस्ति। यथा नानालङ्कारभूषिताः स्त्रियः सुन्दरतया पुरुषमाकर्षयन्ति तथा नानाविधस्वरूपैर्युक्तायाः प्रकृत्याः चित्रविचित्रमनोहारि दृश्यं मनुष्यमाकर्षयति। प्रकृत्याः एतादृशी मनोहारिणा स्वरूपेण अलौकिकसौन्दर्येण च प्रभाविताः अभूत्वा न तिष्ठन्ति विश्वस्य कविवृन्दाः। कविः प्रकृत्या साकं रागात्मकसम्बन्धं स्थापयित्वा प्राकृतिकसौन्दर्यमुपभुनक्ति। स्वानुभूतिं यथावत् कविः काव्ये नाट्ये च रूपान्तरीकरोति। अतः कथ्यते भोक्ताऽस्ति पुरुषः भोक्त्री च प्रकृतिः। सांख्यमतानुसारं प्रकृतिपुरुषयोरयं सम्बन्ध ऐव सृष्टेर्हेतुः भवति। जानकीहरणे प्राकृतिकसौन्दर्यस्य मार्मिकविवेचनं कृतमस्ति कविकुमारदासेन। जानकीहरणस्य परिशीलनात् ज्ञायते यत् नानाविधस्वरूपैर्युक्तेन प्रकृत्याः वास्तविकसौन्दर्यमङ्कयितुं कविकुमारदासेन प्रयासः कृतोऽस्ति। कुमारदासानुसारेण प्रकृतिः परिवर्तनशीला पुरुषस्य सहयात्रिणी च भवति। यथा–

**प्रियाजनपरिष्वङ्गप्रीतिं कर्तुं निरन्तराम्।**
**निशि ज्ञातमनोवृत्तिस्तमुपैति हिमागमः।।**
**तस्योद्यानवनं विश्वं दिवः प्रवसता सता।**
**सर्वर्तुषु निजैः पुष्पैर्भूष्यते मधुनाऽधुना।।**
**दुराराध्यस्वभावस्य समालम्ब्य सिषेविषाम्।**
**जलक्रीडादिनं तस्य ग्रीष्मश्चिरमुदीक्षते।।[11]**

अस्मात् ज्ञायते यत् एकपक्षे प्रकृतिः परमज्ञानिनः रावणस्य सेविकाऽस्ति, अपरपक्षे पुरुषोत्तमरामचन्द्रस्य सेवायाः कृते तस्य आगमनस्य प्रतीक्षायां पृथिव्यां सम्पूर्णं सौन्दर्यं नियोजयति –

**अथ श्रियः प्राणसमस्य तस्य ज्ञात्वा विवक्षामिव मर्त्यधाम।**
**पूर्वावतीर्णः सुमनः समृद्ध्या सम्यग्वसन्तो भुवनं ततान।।[12]**

प्राकृतिकपरिवर्तनस्य एकम् अनुपमं सौन्दर्यम् उपस्थापयति कविकुमारदासः। कमलवनं यदा अयं पश्यति यत् तस्य शत्रुहेमन्तस्य प्रभावः वसन्तस्य सूर्यस्य किरणान् नाशितवान् तदा प्रकृतिः तस्य कण्टकं निःसृतवानिति ज्ञात्वा प्रेम्णा उन्मुक्तहृदयेन च हसितवान्।



**वासन्तिकस्यांशुचयने भानोर्हेमन्तमालोक्य हतप्रभातम्।**
**सरोरुहामुद्धृतकण्टकेन प्रीत्येव रम्यं जहसे वनेन।।[13]**

जानकीहरणे सूर्यास्तस्य चन्द्रोदयस्य च वर्णनमाध्यमेन प्राकृतिकसौन्दर्यं चित्रयति कविकुमारदासः। सूर्योदयस्य अनुपमसौन्दर्यं निम्नोक्तरूपेण चित्रयति कविः।

**सकुङ्कुमस्त्रीकुचमण्डलद्युतिः प्रवासिनां चेतसि चिन्तयातुरे।**
**निधाय तापं तपनः पतत्यसौ विलोलवीचावपरान्तसागरे।।**
**इयं तनुर्वासरसन्धिचारिणी जगत्सृजो विद्रुमभङ्गलोहिनी।**
**समं विधत्ते मुकुलं सरोरुहैर्हिरण्यबाहोरपि हस्तपङ्कजम्।।[14]**

जानकीहरणे प्राप्तचन्द्रोदयस्य वर्णनं हृदयहारि आनन्दप्रदं च। रात्रिकालीनचन्द्रमसः अत्यन्तं सौन्दर्यपरकं हृदयहारि चित्रं प्रस्तौति कविकुमारदासः जानकीहरणस्य अष्टमे तथा षोडशे च सर्गे–

**क्षीरवारिनिधिना विवर्द्धता प्लाव्यमानवदसौ निशाकरः।**
**उत्पतत्युदयतः शनैः शनैर्हारशुभ्रनिजरश्मिसंचयः।।**
**परभृतरुचितासमं हिमांशोरुदयगिरेरुदितस्य मण्डलेन।**
**अतिपटु पटलं विपाट्य विश्वं विवरगते विहतं नु संहतं नु।।**
**इह हरिणकलङ्ककान्तिलेशैः सहपतिता मृगलक्षणस्य कान्तिः।**
**अलिभिरवततैर्न्यधत्त वापी कुमुदवनैरिति शङ्कितं जनेषु।।[15]**

प्राकृतिकसौन्दर्यस्याभिवर्धने पर्वतवनोद्यानानां च महत्त्वपूर्णयोगदानं भवति। जानकीहरणे एतेषां चित्ताकर्षकं वर्णनं प्राप्यते। हिमालयपर्वतस्य वास्तविकसुन्दरतायाः चित्रणं कृत्वा स्वस्य अनुपमवर्णनचातुर्यस्य परिचयं प्रस्तौति कविकुमारदासः।

**नागाङ्गनारत्नमरीचिजालध्वस्तान्धकारप्रकरस्य यस्य।**
**निकुञ्जपद्माकरपद्मखण्डैर्विदन्ति रात्रिन्दिवसंविभागम्।।[16]**

एतदतिरिक्तं कविः देवसहमन्दरादिपर्वतानां अनुपमसौन्दर्यमपि चित्रयति जानकीहरणमहाकाव्ये।[17] कुमारदासस्य प्रकृतिप्रेम अरण्यस्य शोभावर्णनप्रसङ्गे दर्शनीयम्–

**प्रथममश्रुमुखीमपहाय तां पथिक! सम्प्रति किं परितप्यसे।**
**इति यथा विजहास वनस्थली प्रविकसद्दलकन्दलशोभिनी।।[18]**

उद्यानस्य मनोहारिण्याः शोभायाः वास्तविकचित्रणमपि प्राप्यते जानकीहरणे। उद्याने भ्रमराणां समूहः विचरति स्म। रक्तवर्णीयाः करवीरवृक्षाः पङ्क्तौ रोपिता भवन्ति स्म। उद्यानमिदं कामदेवस्य समरभूमिसदृशं विभाति स्म।[19]

अनेन प्रकारेण कविः जानकीहरणे प्रस्तौति प्राकृतिकसौन्दर्यस्य मनोहरच्छटाम्।

निष्कर्षरूपेण वक्तुं शक्यते यत् कविः प्राकृतिकसौन्दर्यम् आकर्षकमूल्यरूपेण स्वीकरोति। अतः स्पष्टं जातं यत् कविः सौन्दर्यप्रेमी आसीत्। सौन्दर्यस्य वास्तविकस्वरूपं महत्त्वं च ज्ञात्वा तस्य सफलरूपान्तरणं कृतमस्ति स्वकाव्ये जानकीहरणे। यद्यपि आन्तरिकबाह्येतिसौन्दर्ये महत्त्वपूर्णे तथापि आन्तरिकसौन्दर्यं स्थायि विलक्षणं च भवति। आन्तरिकसौन्दर्यसम्पन्नमनुष्य एव स्वमूल्यनिष्ठतां समग्रसंसारे स्थापयितुं समर्थो भवति।

## सन्दर्भाः


1. जानकीहरणमहाकाव्यम्, संपादकः - पं. ब्रजमोहन व्यास, 4.9
2. जानकीहरणम्, 4.11
3. जानकीहरणम्, 4.13
4. जानकीहरणम्, 1.54
5. जानकीहरणम्, 1.8
6. जानकीहरणम्, 1.31
7. जानकीहरणम्, 1.43
8. जानकीहरणम्, 3.21
9. जानकीहरणम्, 7.20
10. पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य।
    पङ्ग्वन्धवदुभोरपि संयोगस्तत्कृतः सर्गः।। सांख्यकारिका 21
11. जानकीहरणम्, 2.63,64,65
12. जानकीहरणम्, 3.1
13. जानकीहरणम्, 3.9
14. जानकीहरणम्, 3.64.65
15. जानकीहरणम्, 8.72,16.15-16
16. जानकीहरणम्, 1.50
17. जानकीहरणम्, 20.25, 30
18. जानकीहरणम्, 11.44
19. जानकीहरणम्, 3.14